साङ्ख्यकारिका ।

श्रीईश्वरकृष्णेन विरचिता ।

श्रीगौडपादस्वामिकृतभाष्यसहिता ।

पण्डितकुलपति वि० प० उपाधिधारि-

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्यात्मजाभ्यां

पण्डित श्री आशुबोध विद्याभूषण

पण्डित श्री नित्यबोध विद्यारत्नाभ्या

संस्कृता प्रकाशिता च ।

चतुर्थसंस्करणम् ।

कलिकातानगरे

वाचस्पत्ययन्त्रे मुद्रिता ।

इं १९२६ ।

साङ्ख्यकारिका ।

दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥१॥

कपिलाय नमस्तस्मै, येनाविद्योदधौ जगति मग्ने ।
कारुण्यात् साङ्ख्यमयी, नौरिव विहिता प्रतरणाय ॥ १ ॥
अल्पग्रन्थ स्पष्टं, प्रमाणसिद्धान्तहेतुभिर्युक्तम् ।
शास्त्र शिष्यहिताय, समासतोऽहं प्रवच्यामि ॥ २ ॥

दुःखत्रयेति ।—अस्या आर्य्याया उपोद्घात. क्रियते । इह भगवान् ब्रह्मसुतः कपिलो नाम, तत् यथा,—

"सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
आसुरिः कपिलश्चैव वोढु पञ्चशिखस्तथा ।
इत्येते ब्रह्मणः पुत्राः सप्त प्रोक्ता महर्षय ॥"

कपिलस्य सहोत्पन्नानि 'धर्मो ज्ञानं वैराग्यमैश्वर्य्यञ्च' इति । एव स उत्पन्नः सन् अन्धे तमसि मज्जज्जगदालोक्य संसार-पारम्पर्य्येण सत्कारुण्यो जिज्ञासमानाय आसुरिगोत्राय ब्राह्मणाय इदं पञ्चविंशतितत्त्वाना ज्ञानम् उक्तवान्, यस्य ज्ञानात् दुःखक्षयो भवति,—

"पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥"

तदिदमाह, दुःखत्रयाभिघाताज्जिज्ञासेति ।—तत्र दुःख-त्रयम् आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति । तत्राध्यात्मिकं द्विविधं, शारीरं मानसञ्चेति । शारीरं वात-

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।

पित्तश्लेष्मविपर्य्ययकृतं ज्वरातीसारादि । मानसं प्रियवियोगाप्रियसंयोगादि । आधिभौतिकं चतुर्विधभूतग्रामनिमित्तं मनुष्यपशुमृगपक्षिसरीसृपदंशमशकयूकामत्कुणमत्स्यमकरग्राहस्थावरेभ्यो जरायुजाण्डजस्वेदजोद्भिज्जेभ्य सकाशादुपजायते । आधिदैविकं देवानामिद दैवं, दिवः प्रभवतीति वा दैवं, तदधिकृत्य यदुपजायते शीतोष्णवातवर्षाशनिपातादिकम् ।

एव यथा दुःखत्रयाभिघातज्जिज्ञासा कार्य्या का ? तदभिघातके हेतौ तस्य दुःखत्रयस्य अभिघातको योऽसौ हेतुः तत्रेति । दृष्टे साऽपार्था चेत्, दृष्टे हेतौ दुःखत्रयाभिघातके सा जिज्ञासाऽपार्था चेत् यदि । तत्राध्यात्मिकस्य द्विविधस्यापि आयुर्वेदशास्त्रोक्तयया प्रियसमागमाप्रियपरिहारकटुतिक्तकषायकाथार्दिभिर्दृष्ट एव आध्यात्मिकोपायः । आधिभौतिकस्य रक्षादिनाऽभिघातो दृष्टः । दृष्टे साऽपार्था चेदेव मन्यसे, न, एकान्तात्यन्ततोऽभावात् । यत एकान्ततोऽवश्यम् अत्यन्ततो नित्यं दृष्टेन हेतुनाऽभिघातो न भवति, तस्मादन्यत्र एकान्तात्यन्ताभिघातके हेतौ जिज्ञासा विवादेषा कार्य्येति ॥ १ ॥

यदि दृष्टादन्यत्र जिज्ञासा कार्य्या, ततोऽपि नैव ; यत आनुश्रविको हेतु. दुःखत्रयाभिघातक । अनुश्रूयत इत्यनुश्रवः, तत्र भव आनुश्रविक । स च आगमात् सिद्धः । यथा—

"अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।
किं नूनमस्मान् कृणवदराति. किमु धूर्त्तिरमृतमर्त्यस्य ॥"

कदाचिदिन्द्रादीना देवाना कल्प आसीत्, कथ वयममृता अभूम ? इति विचार्य्य । यस्माद्वयमपाम सोम पीतवन्तः सोमं, तस्मादमृता अभूम अमरा भूतवन्त इत्यर्थः । किञ्च, अगन्म

तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥२॥

ज्योतिः गतवन्तः, लब्धवन्तः ज्योतिः स्वर्गमिति। अविदाम देवान् दिव्यान् विदितवन्तः। एवञ्च किं नूनमस्मान् तृणवद्-राति नून निश्चित किमराति शत्रुरस्मान् तृणवत् कर्त्तति। किमु धूर्त्तिरमृतमर्त्यस्य धूर्त्तिर्जरा हिंसा वा किं करिष्यति अमृतमर्त्यस्य। अन्यच्च, वेदे श्रूयते आत्यन्तिक फल पशु-बधेन। "सर्वांल्लोकान जयति मृत्युं तरति पाप्मान तरति ब्रह्महत्या तरति यो योऽश्वमेधेन यजते" इति। ऐकान्तात्य-न्तिके एवं वेदोक्ते अपार्थैव जिज्ञासा, इति न। उच्यते—दृष्ट-वदानुश्रविक इति दृष्टेन तुल्यो दृष्टवत्, योऽसौ आनु-श्रविकः कस्मात् स दृष्टवत्, यस्मादविशुद्धिक्षयातिशययुक्तः। अविशुद्धियुक्त. पशुघातात्; तथा चोक्तम्,—

"षट् शतानि नियुज्यन्ते पशूना मध्यमेऽहनि।
अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः॥" इति।

इत्थ यद्यपि श्रुतिस्मृतिविहितो धर्मस्तथापि मिश्रीभावाद-विशुद्धियुक्त इति। तथा, —

"बह्वनीन्द्रसहस्राणि देवानाञ्च युगे युगे।
कालेन समतीतानि कालो हि दुरतिक्रमः॥" इति।

एवमिन्द्रादिनाशात् क्षययुक्तः; तथाऽतिशयो विशेषस्तेन युक्तः। विशेषगुणदर्शनादितरस्य दुःखं स्यादिति। एवमानुश्र-विकोऽपि हेतुर्दृष्टवत्। कस्तर्हि श्रेयानिति चेत्? उच्यते—तद्विपरीतः श्रेयान् ताभ्यां दृष्टानुश्रविकाभ्या विपरीतः श्रेयान् प्रशस्यतर इति, अविशुद्धिक्षयातिशययायुक्तत्वात। स कथ-मित्याह, व्यक्ताव्यक्तज्ञविज्ञानात्।—तत्र व्यक्तं महदादि, बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहा-

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥३॥

भूतानि । अव्यक्तं प्रधानम् । न प्रकृतिः । एवमेतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा. कथ्यन्ते । एतद्विज्ञानाच्छ्रेय इति । उक्तञ्च "पञ्चविंशतितत्त्वज्ञः" इत्यादि ॥ २ ॥

अथ व्यक्ताव्यक्तज्ञाना को विशेष इत्युच्यते—मूलप्रकृतिः प्रधान, प्रकृतिविकृतिसप्तकस्य मूलभूतत्वात्, मूलञ्च सा प्रकृतिश्च मूलप्रकृति । अविकृति. अन्यस्मान्नोत्पद्यते, तेन प्रकृति. कस्यचिद्विकारो न भवति। महदाद्याः प्रकृतिविकृतय. सप्त महान् बुद्धि., बुद्धाद्या. सप्त, बुद्धिः १ अहङ्कारः १ पञ्चतन्मात्राणि ५ एताः सप्त प्रकृतिविकृतयः। तत् यथा—प्रधानात् बुद्धिरुत्पद्यते, तेन विकृति प्रधानस्य विकार इति । सैवाहङ्कारमुत्पादयति, अत. प्रकृतिः । अहङ्कारोऽपि बुद्धेरुत्पद्यते इति विकृतिः, स च पञ्चतन्मात्राण्युत्पादयतीति प्रकृति', तत्र शब्दतन्मात्रमहङ्कारादुत्पद्यते इति विकृतिस्तस्मादाकाशमुत्पद्यते इति प्रकृति' । तथा स्पर्शतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेवं वायुमुत्पादयतीति प्रकृतिः। गन्धतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेवं पृथिवीमुत्पादयतीति प्रकृतिः। रूपतन्मात्रमहङ्कारादुत्पद्यते इति विकृतिस्तदेवं तेज उत्पादयतीति प्रकृति' । रसतन्मात्रमहङ्कारादुत्पद्यत इति विकृतिस्तदेवमप उत्पादयतीति प्रकृति' । एवं महदाद्याः सप्त प्रकृतयो विकृतयश्च । षोडशकस्तु विकार', पञ्चबुद्धीन्द्रियाणि पञ्चकर्मेन्द्रियाणि एकादशं मन. पञ्चमहाभूतानि एष षोडशको गणो विकृतिरेव, विकारो विकृतिः । न प्रकृतिर्न विकृतिः पुरुषः ॥ ३ ॥

दृष्टमनुमानमाप्तवचनञ्च सर्वप्रमाणसिद्धत्वात् ।

एवमेषा व्यक्ताव्यतज्ञाना त्रयाणां पदार्थानां कै कियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति । इह लोके प्रमेयवस्तु प्रमाणेन साध्यते, यथा प्रस्थादिभिर्मीहयस्तुलया चन्दनादि ; तस्मात् प्रमाणमभिधेयम् । दृष्टमिति।—दृष्ट यथा श्रोत्रं त्वक् चक्षुर्जिह्वा घ्राणमिति पञ्चबुद्धीन्द्रियाणि, शब्दस्पर्शरूपरसगन्धा एषा पञ्चाना पञ्चैव विषया यथासङ्ख्यम् । शब्दं श्रोत्रं गृह्णाति, त्वक् स्पर्शं, चक्षुः रूपं, जिह्वा रसं, घ्राणं गन्धमिति । एतत् दृष्ट मित्युच्यते प्रमाणम् । प्रत्यक्षेणानुमानेन वा योऽर्थो न गृह्यते स आप्तवचनात् ग्राह्यः । यथेन्द्रो देवराज., उत्तराः कुरवः, स्वर्गोऽप्सरसः इत्यादि । प्रत्यक्षानुमानाग्राह्यमप्याप्तवचनात् गृह्यते । अपि चोक्तम् :—

"आगमो ह्याप्तवचनमाप्त दोषक्षयाद्विदुः ।
क्षीणदोषोऽनृत वाक्य न ब्रूयाद्धेत्वसम्भवात् ॥
स्वकर्मण्यभियुक्तो यः सङ्गद्वेषविवर्जितः ।
पूजितस्तद्विधैर्नित्यमाप्तो ज्ञेय' स तादृश ॥"

एतेषु प्रमाणेषु सर्वप्रमाणानि सिद्धानि भवन्ति । षट् प्रमाणानि जैमिनिः । अथ कानि तानि प्रमाणानि ? —"अर्थापत्तिः सम्भवः अभावः प्रतिभा ऐतिह्यम् उपमानञ्च" इति षट् प्रमाणानि । तत्रार्थापत्तिर्द्विविधा, दृष्टा श्रुता च । तत्र दृष्टा—एकस्मिन् पक्षे आत्मभावो गृहीतश्चेदन्यस्मिन्नप्यात्मभावो गृह्यते एव । श्रुता यथा—दिवा देवदत्तो न भुङ्क्ते, अथ च पीनो दृश्यते, अतोऽवगम्यते रात्रौ भुङ्क्ते इति । सम्भवो यथा—प्रस्थ इत्युक्ते चत्वारः कुडवाः सम्भाव्यन्ते । अभावो नाम प्रागितरेतरात्यन्तसर्वाभावलक्षणः । प्रागभावो यथा

त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥
प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।

—देवदत्तः कौमारयौवनादिषु । इतरेतराभाव',—पटे घटाभाव । अत्यन्ताभाव',—खरविषाण-बन्ध्यासुत खपुष्पवदिति। सर्वाभाव',—प्रध्वंसाभावो दग्धपटवदिति, यथा शुष्कधान्यदर्शनात् वृष्टेरभावोऽवगम्यते। एवमभावोऽनेकधा । प्रतिभा यथा—"दक्षिणेन च विन्ध्यस्य सह्यस्य च यदुत्तरम्। पृथिव्यामासमुद्रायाः स प्रदेशो मनोरम ॥" एवमुक्ते तस्मिन् प्रदेशे शोभना गुणाः सन्तीति प्रतिभोत्पद्यते, ; प्रतिभा च जानतां ज्ञानमिति। ऐतिह्यं यथा—ब्रवीति लोको यथा अत्र वटे यक्षिणी प्रतिवसति इत्येव ऐतिह्यम्। उपमानं यथा—गौरिव गवय', समुद्र इव तडाग.। एतानि षट् प्रमाणानि त्रिषु दृष्टादिष्वन्तर्भूतानि। तत्रानुमाने तावदर्थापत्तिरन्तर्भूता। सम्भवाभावप्रतिभैतिह्योपमाश्चाप्तवचने। तस्मात् त्रिष्वेव सर्वप्रमाणसिद्धत्वात् त्रिविध प्रमाणमिष्टं, तदाह—तेन त्रिविधेन प्रमाणेन प्रमाणसिद्धेर्भवतीति वाक्यशेष । प्रमेयसिद्धि प्रमाणाद्धि। प्रमेय प्रधानं बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि पुरुष इति। एतानि पञ्चविंशतितत्त्वानि व्यक्ताव्यक्तज्ञा इत्युच्यन्ते। तत्र किञ्चित् प्रत्यक्षेण साध्यं किञ्चिदनुमानेन किञ्चिदागमेनेति त्रिविध प्रमाणमुक्तम् ॥ ४ ॥

तस्य किं लक्षणमेतदाह—प्रतिविषयेषु श्रोत्रादीनां शब्दादिविषयेषु अध्यवसायो दृष्टं प्रत्यक्षमित्यर्थः। त्रिविधमनुमानमाख्यातं, पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति। पूर्वमस्यास्तीति पूर्ववत्, यथा मेघोन्नत्या

तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनन्तु ॥५॥

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥६॥
अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।

दृष्टि साधयति पूर्वदृष्टत्वात् । शेषवत् यथा—समुद्रादेकं जल-पल लवणमासाद्य शेषस्याप्यस्ति लवणभाव इति । सामान्यतो दृष्टं—देशान्तराद्देशान्तर प्राप्त दृष्टं गतिमच्चन्द्रतारकं चैत्रवत् । यथा चैत्रनामान देशान्तराद्देशान्तर प्राप्तमवलोक्य गतिमानयमिति, तद्वच्चन्द्रतारकमिति । तथा पुष्यितास्रदर्शनादन्यत्र पुष्यिता आम्रा इति सामान्यतो दृष्टेन साधयति । एतत् सामान्यतो दृष्टम् । किञ्च तल्लिङ्गलिङ्गिपूर्वकमिति तदनुमानं लिङ्गपूर्वकं, यत्र लिङ्गेन लिङ्गी अनुमीयते, यथा—दण्डेन यति । लिङ्गिपूर्वकञ्च यत्र लिङ्गिना लिङ्गमनुमीयते, यथा —दृष्ट्वा यतिमस्येदं विदण्डमिति । आप्तश्रुतिराप्तवचनञ्च । आप्ता आचार्या ब्रह्मादयः, श्रुतिर्वेदः, आप्ताश्च श्रुतिश्च आप्त-श्रुति', तदुक्तमाप्तवचनमिति । एवं त्रिविध प्रमाणमुक्तम् ॥५॥

तत्र केन प्रमाणेन किं साध्यमुच्यते,—सामान्यतोदृष्टादनुमानादतीन्द्रियाणामिन्द्रियाण्यतीत्य वर्त्तमानाना सिद्धि' । प्रधानपुरुषावतीन्द्रियौ सामान्यतो दृष्टेनानुमानेन साध्येते, यस्मान्महदादिलिङ्गं त्रिगुण, यस्येद त्रिगुण कार्य्य तत् प्रधान मिति । यतश्चाचेतनं चेतनमिवाभाति अतोऽन्योऽधिष्ठाता पुरुष इति । व्यक्त प्रत्यक्षमाध्यम् । तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धं, यथा—इन्द्रो देवराजः, उत्तराः कुरवः, स्वर्गोऽप्सरस इति परोक्षमाप्तवचनात् सिद्धम् ॥ ६ ॥

सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥७॥
सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्य्यतस्तदुपलब्धिः ।
महदादि तच्च कार्य्यं प्रकृतिविरूपं सरूपञ्च ॥८॥

अत्र कश्चिदाह प्रधान पुरुषा वा नोपलभ्यते, यच्च नोपलभ्यते लोके तन्नास्ति, तस्मात् तावपि न स्तः ; यथा द्वितीयं शिरस्तोय. बाहुरिति । तदुच्यते—अत्र सतामप्यर्थानामष्टधोपलब्धिर्न भवति , तत् यथा—इह सतामप्यर्थानामतिदूरादनुपलब्धिर्दृष्टा ; यथा—देशान्तरस्थाना चैत्रमैत्रविष्णुमित्राणाम् । सामीप्यात् यथा—चक्षुषाऽञ्जनानुपलब्धि । इन्द्रियाभिघातात् यथा—वधिरान्धयो शब्दरूपानुपलब्धिः । मनोऽनवस्थानात् यथा—व्यग्रचित्तः सम्यक्ग्रथितमपि नावधारयति । सौक्ष्म्यात् यथा—धूमोष्मजलनीहारपरमाणवो गगनगता नोपलभ्यन्ते । व्यवधानात् यथा—कुड्येन पिहित वस्तु नोपलभ्यते । अभिभवात् यथा—सूर्य्यतेजसाऽभिभूता ग्रहनक्षत्रतारकादयः नापलभ्यन्ते । समानाभिहारात् यथा—मुद्गराशौ मुद्ग. क्षिप्त., कुवल्वयामलकमध्ये कुवलयामलके क्षिप्ते, कपोतमध्ये कपोतो नोपलभ्यते समानद्रव्यमध्याहृतत्वात् । एवमष्टधाऽनुपलब्धिः सतामर्थानामिह दृष्टा ॥ ७ ॥

एवञ्चास्ति किमभ्युपगम्यते प्रधानपुरुषयोरप्येतयोर्वाऽनुपलब्धि. केन हेतुना ? केन चोपलब्धिस्तदुच्यते—सौक्ष्म्यात् तदनुपलब्धिः, प्रधानस्येत्यर्थः, प्रधान सौक्ष्म्यान्नोपलभ्यते, यथाऽऽकाशे धूमोष्मजलनीहारपरमाणवः सन्तोऽपि नोपलभ्यन्ते । कथ तर्हि तदुपलब्धिः ? कार्य्यतस्तदुपलब्धि कार्य्यं दृष्ट्वा कारणमनुमीयते ; अस्ति प्रधान कारण यस्येद कार्य्यम् ; बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहा-

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यम्॥९॥

भूतानि एव तत्कार्य्यम्। तच्च कार्य्य प्रकृतिविरूपं प्रकृतिः प्रधानं, तस्या विरूप प्रकृतेरसदृशम्। सरूपञ्च समानरूपञ्च; यथा लोकेऽपि पितुस्तुल्य इव पुत्रो भवत्यतुल्यश्च। येन हेतुना तुल्यमतुल्य तदुपरिष्टात् वक्ष्यामः॥ ८॥

यदिद महदादिकार्य्यं तत् किं प्रधाने सत्? उताहोस्विदसत्? आचार्य्यविप्रतिपत्तेरय संशय; यतोऽत्र साङ्ख्यदर्शने-सत्कार्य्यं बौद्धादीनामसत्कार्य्यम्। यदि सदसन्न भवत्यथासत्सन्न-भवतीति विप्रतिषेधस्तत्राह—असदकरणात् न सदमदसतो-ऽकरणं तस्मात् सत्कार्य्यम्। इह लोकेऽसत्करण नास्ति, यथा सिकताभ्यस्तैलोत्पत्तिः; तस्मात् सतः करणादस्ति प्रागुत्पत्तेः प्रधाने व्यक्तम, अतः सत्कार्य्यम्। किञ्चान्यदुपादानग्रहणात् उपादानं कारण तस्य ग्रहणात्, इह लोके यो येनार्थी स तदु-पादानग्रहणं करोति, दध्यर्थी क्षीरस्य न तु जलस्य, तस्मात् सत्कार्य्यम्। इतश्च सर्वसम्भवाभावात् सर्वस्य सर्वत्र सम्भवो नास्ति, यथा सुवर्णस्य रजतादौ तृणपांशुसिकतासु, तस्मात् सर्व-सम्भवाभावात् सत्कार्य्यम्। इतश्च शक्तस्य शक्यकरणात् इह कुलाल, शक्तो मृद्दण्डचक्रचीवररज्जुनोरादिकरणोपकरणं वा शक्यमेव घट मृत्पिण्डादुत्पादयति, तस्मात् सत्कार्य्यम्। इतश्च कारणभावाच्च सत्कार्य्यं कारणं यल्लक्षण तल्लक्षणमेव कार्य्यमपि; यथा यवेभ्यो यवा, व्रीहिभ्यो व्रीहय.। यदाऽसत्-कार्य्यं स्यात् ततः कोद्रवेभ्य शालय: स्युर्न च सन्तीति, तस्मात् सत्कार्य्यम्। एवं पञ्चभिर्हेतुभिः प्रधाने महदादिलिङ्गमस्ति, तस्मात् सत उत्पत्तिर्नासत इति॥ ९॥

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥१०॥

प्रकृतिविरूप सरूपञ्च यदुक्त तत् कथमित्युच्यते—व्यक्तं महदादिकार्य्यं, हेतुमदिति हेतुरस्यास्ति हेतुमत्, उपादान हेतुः कारणं निमित्तमिति पर्य्याया.। व्यक्तस्य प्रधानं हेतुरस्ति, अतो हेतुमत् व्यक्तं भूतपर्य्यन्तं, हेतुमत् बुद्धितत्त्वं प्रधानेन, हेतुमानहङ्कारो बुद्ध्या, पञ्चतन्मात्राणि एकादशेन्द्रियाणि हेतुमन्त्यहङ्कारेण; आकाश शब्दतन्मात्रेण हेतुमत्, वायुः स्पर्शतन्मात्रेण हेतुमान्, तेजो रूपतन्मात्रेण हेतुमत्, आपो रसतन्मात्रेण हेतुमत्य', पृथिवी गन्धतन्मात्रेण हेतुमती, एवं भूतपर्य्यन्त व्यक्तं हेतुमत्। किञ्चान्यत्, अनित्य यस्मादन्यस्मादुत्पद्यते, यथा—मृत्पिण्डादुत्पद्यते घटः, स चानित्यः। किञ्चाव्यापि असर्वगमित्यर्थः, यथा प्रधानपुरुषौ सर्वगतौ, नैवं व्यक्तम्। किञ्चान्यत्, सक्रियं ससारकाले संसरति, त्रयोदशविधेन करणेन सयुक्तं सूक्ष्मं शरीरमाश्रित्य संसरति, तस्मात् सक्रियम्। किञ्चान्यत्, अनेक बुद्धिरहङ्कार पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहाभूतानि चेति। किञ्चान्यत्, आश्रितं स्वकारणमाश्रयते, प्रधानाश्रिता बुद्धिः, बुद्धिमाश्रितोऽहङ्कारः, अहङ्काराश्रितान्येकादशेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चतन्मात्राश्रितानि पञ्चमहाभूतानीति। किञ्च लिङ्गं लययुक्तं, लयकाले पञ्चमहाभूतानि तन्मात्रेषु लीयन्ते, तान्येकादशेन्द्रियै. सहाहङ्कारे, स च बुद्धौ, सा च प्रधाने लयं यातीति। तथा सावयवम् अवयवा' शब्दस्पर्शरसरूपगन्धाः, तैः सह। किञ्च परतन्त्रं नात्मनः प्रभवति, यथा प्रधानतन्त्रा बुद्धिः, बुद्धितन्त्रोऽहङ्कारः, अहङ्कारतन्त्राणि तन्मात्राणीन्द्रियाणि

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।

च, तन्मात्रतन्त्वाणि पञ्चमहाभूतानि च । एवं परतन्त्वं परायत्तं व्याख्यातं व्यक्तम् । अथोऽव्यक्तं व्याख्यास्यामः, विपरीतमव्यक्तम् एतैरेव गुणैर्यथोक्तैर्विपरीतमव्यक्तं, हेतुमत् व्यक्तमुक्तम् । न हि प्रधानात् परं किञ्चिदस्ति, यतः प्रधानस्यानुत्पत्ति, तस्मादहेतुमदव्यक्तम् । तथाऽनित्यञ्च व्यक्त, नित्यमव्यक्तमनुत्पाद्यत्वात, न हि भूतानीव कुतश्चिदुत्पद्यते इत्यव्यक्तं प्रधानम् । किञ्चाव्यापि व्यक्तं, व्यापि प्रधानं सर्वगतत्वात् । सक्रिय व्यक्तमक्रियमव्यक्त सर्वगतत्वादेव । तथाऽनेकं व्यक्तमेकं प्रधानं कारणत्वात्, त्रयाणा लोकानां प्रधानमेक कारणं, तस्मादेकं प्रधानम् । तथाऽऽश्रित व्यक्तम् अनाश्रितमव्यक्तमकार्य्यत्वात, न हि प्रधानात् किञ्चिदस्ति परं यस्य प्रधान कार्य्यं स्यात् । तथा व्यक्तं लिङ्गम्, अलिङ्गमव्यक्त नित्यत्वात्, महदादिलिङ्गं प्रलयकाले परस्पर प्रलीयते नैवं प्रधानं, तस्मादलिङ्ग प्रधानम् । तथा सावयव व्यक्तं, निरवयवमव्यक्त, न हि शब्दस्पर्शरसरूपगन्धाः प्रधाने सन्ति । तथा परतन्त्वं व्यक्त, स्वतन्त्वमव्यक्त प्रभवत्यात्मनः ॥ १० ॥

एव व्यक्ताव्यक्तयोर्वैधर्म्यमुक्त,साधर्म्यमुच्यते, यदुक्तं 'सरूपञ्च'। —त्रिगुण व्यक्तं सत्त्वरजस्तमासि त्रयो गुणा यस्येति । अविवेकि व्यक्तं न विवेकोऽस्यास्तीति, इदं व्यक्तमिमे गुणा इति न विवेक कर्त्तुं याति, अय गौरयमश्व इति यथा, ये गुणास्तत् व्यक्त यत् व्यक्तं ते च गुणा इति । तथा विषयो व्यक्तं, भोग्यमित्यर्थः, सर्वपुरुषाणा विषयभूतत्वात् । तथा सामान्यं व्यक्त, मूल्यदासौवत् सर्वसाधारणत्वात् । अचेतनं व्यक्तं, सुखदुःखमोहान् न चेतयतीत्यर्थः । तथा प्रसवधर्मि व्यक्त, तत् यथा—

व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥११॥

बुद्धेरहङ्कार' प्रसूयते, तस्मात् पञ्चतन्मात्राणि एकादशेन्द्रियाणि च प्रसूयन्ते, तन्मात्रेभ्यः पञ्चमहाभूतानि । एवमेते व्यक्तधर्माः प्रसवधर्मान्ता उक्ता', एवमेभिरव्यक्तं सरूप, यथा व्यक्त तथा प्रधानमिति । तत्र त्रिगुणं व्यक्तमव्यक्तमपि त्रिगुणं, यस्यैतन्महदादिकार्य्यं त्रिगुणम् । इह यदात्मकं कारणं तदात्मकं कार्य्यमिति ; यथा कृष्णतन्तुकृत कृष्ण एव पटो भवति । तथा अविवेकि व्यक्त, प्रधानमपि गुणैर्न भिद्यते, अन्ये गुणा. अन्यत् प्रधानमेव विवेक्तुं न याति तदविवेकि प्रधानम् । तथा विषयो व्यक्तं, प्रधानमपि सर्वपुरुषविषयभूतत्वात् विषय इति । तथा सामान्यं व्यक्तं, प्रधानमपि सर्वसाधारणत्वात् । तथाऽचेतनंव्यक्तं प्रधानमपि सुखदुःखमोहान् न चेतयतीति कथमनुमीयते, इह ह्यचेतनान्मृत्पिण्डादचेतनो घट उत्पद्यते । तथा प्रसवधर्मि व्यक्तं, प्रधानमपि प्रसवधर्मि, यतः प्रधानात् बुद्धिरुत्पद्यते । एव प्रधानमपि व्याख्यातम् । इदानीं तद्विपरीतस्तथा च पुमानित्येतत् व्याख्यायते ।—तद्विपरीतस्ताभ्या व्यक्ताव्यक्ताभ्या विपरीत' पुमान् ; तत् यथा—त्रिगुण व्यक्तमव्यक्तञ्च, अगुण' पुरुषः । अविवेकि व्यक्तमव्यक्तञ्च, विवेकि पुरुष' । तथा विषयो व्यक्तमव्यक्तञ्च, अविषयः पुरुषः । तथा सामान्यं व्यक्तमव्यक्तञ्च, असामान्य पुरुष । अचेतनं व्यक्तमव्यक्तञ्च, चेतन पुरुष' । सुखदुःखमोहाश्चेतयति सञ्जानीते तस्माच्चेतन पुरुष इति । प्रसवधर्मि व्यक्तं प्रधानञ्च, अप्रसवधर्मी पुरुष, न हि किञ्चित् पुरुषात् प्रसूयते । तस्मादुक्तं तद्विपरीत. पुमानिति । तदुक्त 'तथा च पुमान्' इति, तत् पूर्वस्यामार्य्यायां प्रधानमहेतुमत् यथा व्याख्यातं तथा च पुमान्,

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥ १२॥

तत् यथा हेतुमदनित्यमित्यादि व्यक्तं, तद्विपरीतमव्यक्तं. तत्र हेतुमत् व्यक्तमहेतुमत् प्रधानम् ; तथा च पुमानहेतुमान्, अनुत्पाद्यत्वात् । अनित्यं व्यक्त नित्यं प्रधानम् ; तथा च नित्य. पुमान् । अव्यापि व्यक्त व्यापि प्रधानम् ; तथा च व्यापी पुमान्, सर्वगतत्वात् । सक्रिय व्यक्तमक्रियं प्रधानम् ; तथा च पुमानक्रिय., सर्वगतत्वादेव । अनेक व्यक्तमेकमव्यक्तम् ; तथा च पुमानप्येकः । आश्रितं व्यक्तमनाश्रितमव्यक्तम् , तथा च पुमान-नाश्रितः । लिङ्गं व्यक्तमलिङ्ग प्रधानम् ; तथा च पुमानप्यलिङ्गः, न क्वचिल्लीयते इति । सावयव व्यक्तं निरवयवमव्यक्तम् ; तथा च पुमान् निरवयवः । न हि पुरुषे शब्दादयोऽवयवाः सन्ति । किञ्च परतन्त्रं व्यक्तं स्वतन्त्रमव्यक्तम् ; तथा च पुमानपि स्वतन्त्रः, आत्मनः प्रभवतीत्यर्थं. ॥ ११ ॥

एवमेतदव्यक्तपुरुषयोः साधर्म्यं व्याख्यातं पूर्वस्यामार्य्यायाम् । व्यक्तप्रधानयोः साधर्म्यं पुरुषस्य वैधर्म्यञ्च त्रिगुणमविवेकीत्यादि प्रकृत्यार्य्यया व्याख्यातम् । तत्र यदुक्तं त्रिगुणमिति व्यक्तम-व्यक्तञ्च तत्, के ते गुणा इति तत्स्वरूपप्रतिपादनायेदमाह— प्रीत्यात्मका अप्रीत्यात्मका विषादात्मकाश्च गुणाः सत्त्वरज-स्तमासीत्यर्थं. । तत्र प्रीत्यात्मकं सत्त्वं, प्रीति. सुखं तदात्मक-मिति । अप्रीत्यात्मक रजः, अप्रीतिर्दुःखम् । विषादात्मकं तमः, विषादो मोहः । तथा प्रकाशप्रवृत्तिनियमार्थाः, अर्थशब्दः सामर्थ्यवाची, प्रकाशार्थं सत्त्वं, प्रकाशसमर्थ-मित्यर्थः ; प्रवृत्त्यर्थं रजः । नियमार्थं तमः, स्थितौ समर्थ-मित्यर्थं. ; प्रकाशक्रियास्थितिशीला गुणा इति । तथाऽन्योऽन्या-

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः ।

भिभवाश्रयजननमिथुनवृत्तयश्च—अन्योऽन्याभिभवाः अन्योऽन्याश्रयाः अन्योऽन्यजननाः अन्योऽन्यमिथुनाः अन्योऽन्यवृत्तयश्च ते तथोक्ताः। अन्योऽन्याभिभवा इति—अन्योऽन्यं परस्परमभिभवन्तीति, प्रीत्यप्रीत्यादिभिर्धर्मैराविर्भवन्ति, यथा यदा सत्त्वमुत्कट भवति तदा रजस्तमसी अभिभूय स्वगुणेन प्रीतिप्रकाशात्मकेनावतिष्ठते, यदा रजस्तदा सत्त्वतमसी अप्रीतिप्रवृत्त्यात्मना धर्मेण,यदा तमस्तदा सत्त्वरजसी विषादस्थित्यात्मकेन इति। तथाऽन्योऽन्याश्रयाश्च द्व्यणुकवत् गुणाः। अन्योऽन्यजननाः, यथा मृत्पिण्डो घटं जनयति। तथाऽन्योऽन्यमिथुनाश्च, यथा स्त्रीपुंसौ अन्योऽन्यमिथुनौ तथा गुणाः। उक्तञ्च,—

"अन्योऽन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः।
रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः॥
तमसश्चापि मिथुने ते सत्त्वरजसी उभे।
उभयोः सत्त्वरजसोर्मिथुन तम उच्यते॥
नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते॥"

परस्परसहाया इत्यर्थः। अन्योऽन्यवृत्तयश्च परस्पर वर्त्तन्ते "गुणाः गुणेषु वर्त्तन्ते" इति वचनात्। यथा सुरूपा सुशीला स्त्री सर्वसुखहेतुः, सपत्नीनां सैव दुःखहेतु., सैव रागिणा मोहं जनयति,एवं सत्त्वं रजस्तमसोर्वृत्तिहेतु.। यथा राजा सदोद्युक्तः प्रजापालने दुष्टनिग्रहे शिष्टाना सुखमुत्पादयति, दुष्टाना दुःखं मोहञ्च, एवं रजः सत्त्वतमसोर्वृत्तिं जनयति। तथा तमः स्वरूपेणावरणात्मकेन सत्त्वरजसोर्वृत्तिं जनयति, यथा मेघा खमावृत्य जगतः सुखमुत्पादयन्ति ते दृष्ट्वा कर्षकाणा कर्षणोद्योगं जनयन्ति निरुद्धिणा मोहम्, एवमन्योऽन्यवृत्तयो गुणा. ॥१२॥

गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥१३॥
अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्य्ययाभावात् ।
कारणगुणात्मकत्वात् कार्य्यस्याव्यक्तमपि सिद्धम्॥१४

किञ्चान्यत्, सत्त्वं लघु प्रकाशकञ्च—यदा सत्त्वमुत्कटं भवति तदा लघून्यङ्गानि बुद्धिप्रकाशश्च प्रसन्नतेन्द्रियाणा भवति। उपष्टम्भकं चलञ्च रज,—उपष्टम्भातौत्युपष्टम्भकमुद्योतकं, यथा वृषो वृषदर्शने उत्कटमुपष्टम्भं करोति, एव रजोवृत्ति', तथा रजश्च चलं दृष्ट, रजोवृत्तिश्चलचित्तो भवति। गुरु वरणकमेव तमः,—यदा तम उत्कट भवति तदा गुरूण्यङ्गान्यावृतानीन्द्रियाणि भवन्ति स्वार्थासमर्थानि। अत्राह—यदि गुणा' परस्परं विरुद्धाः स्वमतेनैव कमर्थं निष्पादयन्ति, तर्हि कथं प्रदीपवच्चार्थतो वृत्तिः, प्रदीपेन तुल्यं प्रदीपवत्, अर्थतः साधना वृत्तिरिष्टा, यथा प्रदीपः परस्परविरुद्धतैलाग्निवर्त्तिसयोगादथप्रकाशान् जनयति, एव सत्त्वरजस्तमासि परस्पर विरुद्धान्यर्थं निष्पादयन्ति ॥ १३ ॥

अन्तरप्रश्नो भवति त्रिगुणमविवेकिविषय इत्यादिना प्रधान व्यक्तञ्च व्याख्यातं,तत्र प्रधानमुपलभ्यमानं महदादि च त्रिगुणम्; अविवेक्यादौति च कथमवगम्यते? तत्राह—योऽयमविवेक्यादिर्गुणः स त्रैगुण्यान्महदादौ व्यक्तेनाय सिध्यति। अत्रोचते तद्विपर्य्ययाभावात्—तस्य विपर्य्ययस्तद्विपर्य्ययस्तस्याभावस्तद्विपर्य्ययाभाव, तस्मात् सिद्धमव्यक्तम्। यथा यत्रैव तन्तवस्तत्रैव पटः.अन्ये तन्तवोऽन्यः पटो न,कुतः? तद्विपर्य्ययाभावात्। एव व्यक्ताव्यक्तसम्पन्नो भवति, दूर प्रधानमामन्न व्यक्त, यो व्यक्तं पश्यति स प्रधानमपि पश्यति, तद्विपर्य्ययाभावात्। इतश्चाव्यक्तं

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्य्यविभागादविभागाद्वैश्वरूपस्य ॥१५॥

सिद्धं कारणगुणात्मकत्वात् कार्य्यस्य, लोके यदात्मकं कारणं तदात्मकं कार्य्यमपि, यथा क्षणेभ्यस्तन्तुभ्यः क्षण एव पटो भवति । एवं महदादिलिङ्गमविवेकिविषयः सामान्यमचेतनं प्रसवधर्मि, यदात्मकं लिङ्गं तदात्मकमव्यक्तमपि सिद्धम् ॥१४॥

त्रैगुण्यादविवेक्यादिर्व्यक्ते सिद्धस्तद्विपर्य्ययाभावात्, एवं कारणगुणात्मकत्वात् कार्य्यस्याव्यक्तमपि सिद्धमित्येतन्मिथ्या, लोके यन्नोपलभ्यते तन्नास्ति,इति न वाच्यम् ; सतोऽपि पाषाण-गर्भादेरनुपलम्भात्, एव प्रधानमप्यस्ति किन्तु नोपलभ्यते, तदाह—कारणमस्त्यव्यक्तमिति क्रियाकारकसम्बन्धः। भेदानां परिमाणात्—लोके यत्र कर्त्ताऽस्ति तस्य परिमाणं दृष्टं, यथा कुलालः परिमितैर्मृत्पिण्डैः परिमितानेव घटान् करोति, एवं महदपि महदादिलिङ्गं परिमितं भेदत., प्रधानकार्य्यमेका बुद्धिरेकोऽहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहा-भूतानीत्येवं भेदाना परिमाणादस्ति प्रधानं कारणं यत् व्यक्तं परिमितमुत्पादयति । यदि प्रधान न स्यात्, तदा निष्परि-माणमिदं व्यक्तमपि न स्यात्, परिमाणाच्च भेदानामस्ति प्रधानं यस्मात् व्यक्तमुत्पन्नम् । तथा समन्वयात्, इह लोके प्रसिद्धिर्दृष्टा यथा व्रतधारिणं वटुं दृष्ट्वा समन्वयति नूनमस्य पितरौ ब्राह्मणाविति. एवमिदं त्रिगुणं महदादिलिङ्गं दृष्ट्वा साधयामोऽस्य यत् कारणं भविष्यतीति, अतः समन्वयादस्ति प्रधानम् । तथा शक्तितः प्रवृत्तेश्च, इह यो यस्मिन् शक्तः स तस्मिन्नेवार्थे प्रवर्त्तते, यथा कुलालो घटस्य करणे समर्थो घटमेव करोति न पटं रथं वा । तथा अस्ति प्रधानं कारणं,

कारणमस्त्यव्यक्तं प्रवर्त्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्॥१५

कुतः ? कारणकार्य्यविभागात्—करोतीति कारणं, क्रियते इति कार्य्यम् ; कारणस्य कार्य्यस्य च विभागः,—यथा घटो दधिमधूदकपयसा धारणे समर्थो न तथा तत्कारणं मृत्पिण्डः । मृत्पिण्डो वा घट निष्पादयति न चैवं घटो मृत्पिण्डम् । एवं महदादिलिङ्गं दृष्ट्वाऽनुमीयते, अस्ति विभक्तं तत्कारणं यस्य विभाग इद व्यक्तमिति । इतश्च अविभागात् वैश्वरूपस्य—विश्वं जगत, तस्य रूपं व्यक्तिः, विश्वरूपस्य भावो वैश्वरूपं, तस्याविभागादस्ति प्रधानं, यस्मात् त्रैलोक्यस्य पञ्चाना पृथिव्यादीना महाभूतानां परस्परं विभागो नास्ति महाभूतेष्वन्तर्भूतास्त्रयो लोका इति, पृथिव्यापस्तेजो वायुराकाशमिति, एतानि पञ्चमहाभूतानि प्रलयकाले सृष्टिक्रमेणैवाविभागं यान्ति तन्मात्रेषु परिणामिषु, तन्मात्राण्येकादशेन्द्रियाणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धि प्रधाने, एव त्रयो लोकाः प्रलयकाले प्रकृतावविभागं गच्छन्ति, तस्मादविभागात् क्षीरदधिवत् व्यक्ताव्यक्तयोरस्त्यव्यक्तं कारणम् ॥ १५ ॥

अतश्च—अव्यक्तं प्रख्यात कारणमस्ति यस्मान्महदादिलिङ्गं प्रवर्त्तते । त्रिगुणत. त्रिगुणात्, सत्त्वरजस्तमासि गुणा यस्मिन् तत् त्रिगुणम् ; तत् किमुक्त भवति ? सत्त्वरजस्तमसा साम्यावस्था प्रधानम् । तथा समुदयात्, यथा गङ्गास्रोतासि त्रीणि रुद्रमूर्द्धनि पतितानि एक स्रोतो जनयन्ति, एव त्रिगुणमव्यक्तमेकं व्यक्त जनयति । यथा वा तन्तवः समुदिताः पटं जनयन्ति, एवमव्यक्तं गुणसमुदयान्महदादि जनयतीति त्रिगुणतः समुदयाच्च व्यक्तं जगत् प्रवर्त्तते । यस्मादेकस्मात् प्रधानात् व्यक्तं

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्य्ययादधिष्ठानात्।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥१७॥

तस्मादेकरूपेण भवितव्यम्; नैष दोषः। परिणामत सलिल-वत् प्रतिप्रतिगुणाश्रयविशेषात्, एकस्मात् प्रधानात् त्रयो लोकाः समुत्पन्नास्तुल्यभावा न भवन्ति, देवाः सुखेन युक्ता., मनुष्या दुःखेन, तिर्य्यञ्चो मोहेन, एकस्मात् पधानात् प्रवृत्तं व्यक्तं प्रतिप्रतिगुणाश्रयविशेषात् परिणामत' सलिलवत् भवति —प्रतिप्रतीति वीप्सा, गुणानामाश्रयो गुणाश्रयस्तद्विशेषस्तं गुणाश्रयविशेषं प्रतिनिधाय प्रतिप्रतिगुणाश्रयविशेषं परि-णामात् प्रवर्त्तते व्यक्तं, यथा आकाशादेकरस सलिलं पतितं नानारूपात् संश्लेषाद्विद्यते तत्तद्रसान्तरैः,एवमेकस्मात् प्रधानात् प्रवृत्तास्त्रयो लोका नैकस्वभावा भवन्ति, देवेषु सत्त्वमुत्कटं रजस्तमसी उदासीने, तेन तेऽत्यन्तसुखिन ; मनुष्येषु रज उत्कट भवति सत्त्वतमसी उदासीने, तेन तेऽत्यन्तदुःखिनः; तिर्य्यक्षु तम उत्कटं भवति सत्त्वरजसी उदासीने, तेन तेऽत्यन्त-मूढा. ॥ १६ ॥

एवमार्य्याद्वयेन प्रधानस्यास्तित्वमवगम्यते; इतश्चोत्तरं पुरुषास्तित्वप्रतिपादनार्थमाह, यदुक्तं—"व्यक्ताव्यक्तज्ञविज्ञाना-न्मोक्षः प्राप्यते" इति, तत्र व्यक्तादनन्तरमव्यक्त पञ्चभिः कारणै-रधिगतं व्यक्तवत्। पुरुषोऽपि सूक्ष्मः, तस्याधुनानुमितास्तित्वं प्रतिक्रियते—अस्ति पुरुष., कस्मात्? सङ्घातपरार्थत्वात्। योऽयं महदादिसङ्घातः स पुरुषार्थ इत्यनुमीयते, अचेतनत्वात् पर्य्यङ्कवत्, यथा पर्य्यङ्कः प्रत्येकं गातोत्पलकपाटपौठतूली-प्रच्छादनपटोपधानसङ्घातः परार्थो न हि स्वार्थः, पर्य्यङ्कस्य न हि किञ्चिदपि गातोत्पलाद्यवयवानां परस्परं ज्ञत्यमस्ति।

जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव ॥ १८ ॥

अतोऽवगम्यते अस्ति पुरुषो यः पर्य्यङ्के शेते, यस्यार्थं पर्य्यङ्कस्तत्परार्थम् ; इदं शरीरं पञ्चानां महाभूतानां सङ्घातो वर्त्तते, अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्यमहदादिसङ्घातरूपं समुत्पन्नमिति। इतश्चात्माऽस्ति त्रिगुणादिविपर्य्ययात्। यदुक्तं पूर्वस्यामार्य्यायां "त्रिगुणमविवेकिविषय" इत्यादि। तस्माद्विपर्य्ययात्, येनोक्तं तद्विपरीतस्तथा च पुमान्। अधिष्ठानात्, यथेह लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाऽधिष्ठित प्रवर्त्तते तथा आत्माऽधिष्ठानाच्छरीरमिति। तथा चोक्तं षष्टितन्त्रे "पुरुषाधिष्ठितं प्रधानं प्रवर्त्तते"। अतोऽस्त्यात्मा, भोक्तृत्वात्। यथा मधुराम्ललवणकटुतिक्तकषायषड्रसोपहितस्य संयुक्तस्यान्नस्य साध्यते, एवं महदादिलिङ्गस्य भोक्तृत्वाभावादस्ति स आत्मा यस्येदं भोग्यं शरीरमिति। इतश्च, कैवल्यार्थं प्रवृत्तेश्च—केवलस्य भावः कैवल्यं तन्निमित्ता या च प्रवृत्तिस्तस्या स्वकैवल्यार्थं प्रवृत्तेः सकाशादनुमीयते, अस्त्यात्मेति ; यतः सर्वो विद्वानविद्वांश्च संसारसन्तानच्छेदमिच्छति। एवमेभिर्हेतुभिरस्त्यात्मा शरीरात् व्यतिरिक्तः ॥ १७ ॥

अथ स. किमेकः सर्वशरीरे अधिष्ठाता मणिरशनात्मकसूत्रवत् ? आहोस्वित् बहव आत्मानः प्रतिशरीरमधिष्ठातार इति ? अत्रोच्यते—जन्म च मरणञ्च करणानि च जन्ममरणकरणानि तेषां प्रतिनियमात् प्रत्येकनियमादित्यर्थः। यद्येक एव आत्मा स्यात् तत एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये वाधिर्यान्धत्वमूकत्वकुणित्वखञ्जत्व-

तस्माच्च विपर्य्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्त्तृभावश्च ॥ १९ ॥

लक्षणे सर्वेऽपि बधिरान्धमूककुणित्वज्ञा स्यु:, न चैव भवति, तस्माज्जन्ममरणकरणाना प्रतिनियमात् पुरुषबहुत्वं सिद्धम्। इतश्च, अयुगपत् प्रवृत्तेश्च—युगपदेककालं, न युगपदयुगपत् प्रवर्त्तनं, यस्मादयुगपद्धर्मादिषु प्रवृत्तिर्दृश्यते, एके धर्मे प्रवृत्ता:, अन्येऽधर्मे, वैराग्येऽन्ये, ज्ञानेऽन्ये प्रवृत्ता:, तस्मादयुगपत् प्रवृत्तेश्च बहव इति सिद्धम्। किञ्चान्यत् त्रैगुण्यविपर्य्ययाच्चैव, त्रिगुण-भावविपर्य्ययाच्च पुरुषबहुत्वं सिद्धम्। यथा सामान्ये जन्मनि एक सात्त्विक: सुखी, अन्यो राजसो दुःखी, अन्यस्तामसो मोहवान्, एव त्रैगुण्यविपर्य्ययाद्बहुत्वं सिद्धमिति ॥ १८ ॥

अकर्त्ता पुरुष इत्येतदुच्यते,—तस्माच्च विपर्य्यासात्—तस्माच्च यथोक्तत्रैगुण्यविपर्य्यासादिपर्य्ययान्निर्गुण: पुरुषो विवेकी भोक्तेत्यादिगुणाना पुरुषस्य यो विपर्य्यास उक्तस्तस्मात्, सत्त्वरजस्तम सु कर्त्तृभूतेषु साक्षित्वं सिद्धं पुरुषस्येति, योऽयमधिकृतो बहुत्वं प्रति। गुणा एव कर्त्तार: प्रवर्त्तन्ते, साक्षी न प्रवर्त्तते नापि निवर्त्तते एव। किञ्चान्यत्, कैवल्य केवल-भाव:, कैवल्यमन्यत्वमित्यर्थ:, त्रिगुणेभ्य: केवलोऽन्य:। माध्यस्थ्यं मध्यस्थभाव:, परिव्राजकवत् मध्यस्थ: पुरुष:; यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थ:, पुरुषोऽप्येवं गुणेषु प्रवर्त्तमानेषु न प्रवर्त्तते, तस्माद्द्रष्टृत्वमकर्त्तृभावश्च, यस्मान्मध्यस्थस्तस्मात् द्रष्टा तस्माद-कर्त्ता पुरुषस्तेषा कर्मणामिति सत्त्वरजस्तमासि त्रयो गुणा कर्मकर्त्तृभावेन प्रवर्त्तन्ते, न पुरुष:, एवं पुरुषस्यास्तित्वञ्च सिद्धम् ॥ १९ ॥

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥२०॥
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

यस्मादकर्त्ता पुरुषस्तत् कथमध्यवसायं करोति ? धर्मं करिष्याम्यधर्मं न करिष्यामीत्यतः कर्त्ता भवति, न च कर्त्ता पुरुष एवमुभयथा दोषः स्यादिति, अत उच्यते—इह पुरुषश्चेतनावान् तेन चेतनावभाससयुक्तं महदादिलिङ्गं चेतनावदिव भवति, यथा लोके घटः शीतसंयुक्तः शीत., उष्णसयुक्त उष्णः, एवं महदादि लिङ्गं तस्य सयोगात् पुरुषसयोगाच्चेतनावदिव भवति, तस्मात् गुणा अध्यवसायं कुर्वन्ति न पुरुष.। यद्यपि लोके पुरुषः कर्त्ता गन्तेत्यादि प्रयुज्यते तथाऽप्यकर्त्ता पुरुषः । कथम् ? गुणकर्त्तृत्वे च तथा कर्त्तेव भवत्युदासीनः,—गुणाना कर्त्तृत्वे सति उदासीनोऽपि पुरुषः कर्त्तेव भवति, न कर्त्ता । अत्र दृष्टान्ता भवति, यथाऽचौरश्चौरैः सह गृहीतश्चौर इत्यवगम्यते, एवं त्रयो गुणाः कर्त्तार, तै संयुक्तः पुरुषोऽकर्त्ताऽपि कर्त्ता भवति कर्त्तृसयोगात् । एव व्यक्ताव्यक्तज्ञाना विभागो विख्यातः, यद्विभागान्मोक्षप्राप्तिरिति ॥२०॥

अथैतयो प्रधानपुरुषयोः किंहेतु सङ्गतः ? उच्यते—पुरुषस्य प्रधानेन सह सयोगो दर्शनार्थं, प्रकृति महदादि कार्य्यं भूतपर्य्यन्त पुरुषः पश्यति, एतदर्थं प्रधानस्यापि पुरुषेण सयोगः कैवल्यार्थम् । स च संयोगः पङ्ग्वन्धवदुभयोरपि द्रष्टव्यः, यथा एकः पङ्गुरेकश्चान्ध एतौ द्वावपि गच्छन्तौ महता सामर्थ्येनाटव्यां सार्थस्य स्तेनकृतादुपप्लवात् स्वबन्धुपरित्यक्तौ दैवादितश्चेतश्च चेरतुः, स्वगत्या च तौ संयोगमुपयातौ

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः।
तस्मादपि षोड़शकात् पञ्चभ्यः पञ्चभूतानि ॥२२॥

पुनस्तयोः स्ववचसोर्विश्वस्तत्वेन संयोगो गमनार्थं दर्शनार्थञ्च भवति. अन्धेन पङ्गुः स्कन्धमारोपितः, एवं शरीरारूढपङ्गुदर्शितेन मार्गेणान्धो याति पङ्गुश्चान्धस्कन्धारूढ.। एवं पुरुषे दर्शनशक्तिरस्ति पङ्गुवन्न क्रिया, प्रधाने क्रियाशक्तिरस्त्यन्धवन्न दर्शनशक्ति। यथा वा अनयो पङ्ग्वन्धयोः कृतार्थयोर्विभागो भविष्यतौप्सितस्थानप्राप्तयो., एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्त्तते, पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति, तयोः कृतार्थयोर्विभागो भविष्यति। किञ्चान्यत्, तत्कृतः सर्ग,—तेन संयोगेन कृतस्तत्कृत, सर्ग. सृष्टि, यथा स्त्रीपुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुषसंयोगात् सर्गस्योत्पत्ति. ॥ २१ ॥

इदानीं सर्गविभागदर्शनार्थमाह—प्रकृतिः प्रधानं ब्रह्म अव्यक्तं बहुधानकं मायेति पर्य्याया.। अलिङ्गस्य प्रकृतेः सकाशान्महानुत्पद्यते, महान् बुद्धिरासुरी मतिः ख्यातिर्ज्ञानमिति प्रज्ञापर्य्यायैरुत्पद्यते। तस्माच्च महतोऽहङ्कार उत्पद्यते, अहङ्कारो भूतादिर्वैकृतस्तैजसोऽभिमान इति पर्य्यायाः। तस्माद्गणश्च षोडशक, तस्मादहङ्कारात् षोडशकः षोडशस्वरूपेण गण उत्पद्यते; स यथा—पञ्चतन्मात्राणि, शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति। तन्मात्रसूक्ष्मपर्य्यायवाच्यानि। तत एकादशेन्द्रियाणि, श्रोत्रं त्वक् चक्षुषी जिह्वा घ्राणमिति पञ्च बुद्धीन्द्रियाणि, वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि,उभयात्मकमेकादशं मनश्च, एषः षोड़शको गणोऽहङ्कारादुत्पद्यते। किञ्च पञ्चभ्यः पञ्च-

अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्य्यम् ।

भूतानि—तस्मात् षोडशकात्गणात् पञ्चभ्यस्तन्मात्रेभ्यः सकाशात् पञ्च वै महाभूतान्युत्पद्यन्ते ; यदुक्तं—शब्दतन्मात्रादाकाशं, स्पर्शतन्मात्राद्वायु., रूपतन्मात्रात्तेज., रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी, एवं पञ्चभ्यः परमाणुभ्य. पञ्चमहाभूतान्युत्पद्यन्ते ॥ २२ ॥

यदुक्तं "व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष." इति, तत्र महदादि भूतान्तं त्रयोविंशतिभेदं व्याख्यातम्, अव्यक्तमपि "भेदानां परिमाणात्" इत्यादिना व्याख्यातं, पुरुषोऽपि "सङ्घातपरार्थत्वात्" इत्यादिभिर्हेतुभिर्व्याख्यात. । एवमेतानि पञ्चविंशतितत्त्वानि, यस्तैस्त्रैलोक्यं व्याप्तं जानाति, तस्य भावोऽस्तित्वं तत्त्वं, यथोक्तं—"पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रत. । जटी मुण्डी शिखी वापि मुच्यते नात्र संशय. ॥" तानि यथा—प्रकृति. पुरुषो बुद्धिरहङ्कारः पञ्चतन्मात्राणि एकादशेन्द्रियाणि पञ्चमहाभूतानि इत्येतानि पञ्चविंशतितत्त्वानि । तत्रोक्तप्रकृतेर्महानुत्पद्यते, तस्य महतः किं लक्षणमित्येतदाह—अध्यवसायो बुद्धिलक्षणम्, अध्यवसानमध्यवसायः ; यथा बीजे भविष्यद्वृत्तिकोऽङ्कुरस्तद्वदध्यवसायोऽयं घटोऽयं पट इत्येवम् अध्यवस्यति या सा बुद्धिरिति लक्ष्यते । सा च बुद्धिरष्टाङ्गिका सात्त्विक-तामसरूपभेदात् । तत्र बुद्धे. सात्त्विक रूपं चतुर्विधं भवति, धर्मो ज्ञान वैराग्यमैश्वर्य्यञ्चेति । तत्र धर्मो नाम दयादानयमनियमलक्षणः ; तत्र यमा नियमाश्च पातञ्जलेऽभिहिताः,—"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमा." "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा." । ज्ञान प्रकाशोऽवगमो भानमिति पर्य्याया. , तच्च द्विविध, वाह्यमाभ्य-

सात्त्विकमेतद्रूपं तामसमस्माद्विपर्य्यस्तम् ॥ २३ ॥

न्तरङ्गेति । तत्र वाह्यं नाम वेदाः शिक्षाकल्पव्याकरण-निरुक्तच्छन्दोज्योतिषाख्यषडङ्गसहिताः पुराणानि न्याय-मीमांसाधर्मशास्त्राणि चेति । आभ्यन्तरं प्रकृतिपुरुषज्ञानम्, इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था, अयं पुरुषः सिद्धो निर्गुणो व्यापी चेतन इति । तत्र वाह्यज्ञानेन लोकपङ्क्ति-र्लोकानुराग इत्यर्थः । आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः । वैराग्यमपि द्विविधं, वाह्यमाभ्यन्तरञ्च; वाह्यं दृष्टविषयवैतृष्ण्य-मर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनात् विरक्तस्य; आभ्यन्तरं प्रधानमप्यत्र स्वप्नेन्द्रजालसदृशमिति विरक्तस्य मोक्षैषोर्यदुत्-पद्यते तदाभ्यन्तरं वैराग्यम् । ऐश्वर्य्यमीश्वरभावः, तच्चाष्ट-गुणम्—अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमौशित्वं वशित्वं यत्र कामावसायित्वञ्चेति । अणोर्भावोऽणिमा सूक्ष्मो भूत्वा जगति विचरतीति । महिमा महान् भूत्वा विचर-तीति । लघिमा मृणालतूलावयवादपि लघुतया पुष्पकेसराग्रे-ष्वपि तिष्ठति । प्राप्तिरभिमतं वस्तु यत्र तत्रावस्थित. प्राप्नोति । प्राकाम्यं प्रकामतो यदेवेच्छति तदेव विदधाति । ईशित्वं प्रभुतया त्रैलोक्यमपीष्टे । वशित्वं सर्वं वशीभवति । यत्र कामावसायित्व ब्रह्मादिस्तम्बपर्य्यन्तं, यत्र कामस्तत्रैवास्य स्वेच्छया स्थानासनविहारानाचरतीति । चत्वारि एतानि बुद्धे. सात्त्विकानि रूपाणि । यदा सत्त्वेन रजस्तमसी अभिभूते, तदा पुमान् बुद्धिगुणान् धर्मादीनाप्नोति । किञ्चान्यत्, तामसमस्मात् विपर्य्यस्तम्—अस्माद्धर्मादेर्विपरीतं तामसं बुद्धिरूपं,तत्र धर्माद्वि-परीतोऽधर्मः, एवमज्ञानमवैराग्यमनैश्वर्य्यमिति । एवं सात्त्विकै-स्तामसै. स्वरूपैरष्टाङ्गा बुद्धिस्त्रिगुणादव्यक्तादुत्पद्यते ॥ २३ ॥

अभिमानोऽहङ्कारस्तस्मात् द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव ॥ २४ ॥
सात्त्विक एकादशकः प्रवर्त्तते वैकृताद्दहङ्कारात् ।
भूतादिस्तन्मात्रः स तामसस्तैजसादुभयम् ॥२५॥

एवं बुद्धिलक्षणमुक्तम्, अहङ्कारलक्षणमुच्यते—एकादशकश्च गण एकादशेन्द्रियाणि तथा तन्मात्रो गणः पञ्चकः पञ्चलक्षणोपेत' शब्दतन्मात्र-स्पर्शतन्मात्र-रूपतन्मात्र-रसतन्मात्र-गन्धतन्मात्रलक्षणोपेत ॥ २४ ॥

किं लक्षणात् सर्ग इत्येतदाह—सत्त्वेनाभिभूते यदा रजस्तमसी अहङ्कारे भवतस्तदा सोऽहङ्कारः सात्त्विक', तस्य च पूर्वाचार्यैः सञ्ज्ञा कृता वैकृत इति । तस्माद्वैकृताद्दहङ्कारादेकादशक इन्द्रियगण उत्पद्यते । तस्मात् सात्त्विकानि विशुद्धानीन्द्रियाणि स्वविषयसमर्थानि, तस्मादुच्यते सात्त्विक एकादशक इति । किञ्चान्यत, भूतादिस्तन्मात्र. स तामस,—तमसाभिभूते सत्त्वरजसौ अहङ्कारे यदा भवत., तदा सोऽहङ्कारस्तामस उच्यते, तस्य पूर्वाचार्यैरुक्ता संज्ञा भूतादिः, तस्मात् भूतादिरहङ्कारात् तन्मात्र. पञ्चको गण उत्पद्यते, भूतानामादिभूतस्तमोबहुलस्तेनोक्तः स तामस इति ; तस्मात् भूतादे' पञ्चतन्मात्रको गणः । किञ्च, तैजसादुभयं—यदा रजसाभिभूते सत्त्वतमसी अहङ्कारे भवतस्तदा तस्मात् सोऽहङ्कारस्तैजस इति सञ्ज्ञा लभते, तस्मात्तैजसादुभयमुत्पद्यते । उभयमिति एकादशो गणस्तन्मात्रः पञ्चक. । योऽय सात्त्विकोऽहङ्कारो वैकृतिको विकृतो भूत्वा एकादशेन्द्रियाण्यत्पादयति स तैजसमहङ्कार सहायं गृह्णाति,सात्त्विको निष्क्रिय, स तैजसयुक्त इन्द्रियोत्पत्तौ समर्थ. ; तथा तामसोऽहङ्कारो भूतादिसञ्ज्ञितो निष्क्रियत्वात्

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि ।
वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥२६॥
उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात् ।

तैजसेनाहङ्कारेण क्रियावता युक्तस्तन्मात्राण्युत्पादयति, तेनोक्तं तैजसादुभयमिति । एवं तैजसेनाहङ्कारेणेन्द्रियाण्येकादश पञ्चतन्मात्राणि कृतानि भवन्ति ॥ २५ ॥

सात्त्विक एकादशक इत्युक्तं, यो वैकृतात् सात्त्विक एकादशक सात्त्विकादहङ्कारादुत्पद्यते तस्य का सञ्ज्ञेत्याह—चक्षुरादीनि स्पर्शनपर्य्यन्तानि बुद्धीन्द्रियाण्युच्यन्ते । स्पृश्यतेऽनेनेति स्पर्शन त्वगिन्द्रिय, तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति, तेनेदं पठ्यते स्पर्शनकानीति । शब्दस्पर्शरूपरसगन्धान् पञ्च विषयान् बुध्यन्ते अवगच्छन्तीति पञ्च बुद्धीन्द्रियाणि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः, कर्म कुर्वन्तीति कर्मेन्द्रियाणि । तत्र वाक् वदति,हस्तौ नानाव्यापारं कुरुतः,पादौ गमनागमनं, पायुरुत्सर्गं करोति, उपस्थ आनन्द प्रजोत्पत्त्या ॥ २६ ॥

एव बुद्धीन्द्रियकर्मेन्द्रियभेदेन दशेन्द्रियाणि व्याख्यातानि, मन एकादशक किमात्मक किस्वरूपञ्चेति तदुच्यते,—अत्रेन्द्रियवर्गे मन उभयात्मक, बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् कर्मेन्द्रियेषु कर्मेन्द्रियवत् । कस्मात् ? बुद्धीन्द्रियाणा प्रवृत्तिं कल्पयति कर्मेन्द्रियाणाञ्च, तस्मादुभयात्मकं मन । सङ्कल्पयतीति सङ्कल्पकम् । किञ्चान्यत्, इन्द्रियञ्च साधर्म्यात्—समानधर्मभावात्, सात्त्विकाहङ्कारात् बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनसा सहोत्पद्यमानानि मनसः साधर्म्यं प्रति, तस्मात् साधर्म्यान्मनोऽपीन्द्रियम्, एवमेतान्येकादशेन्द्रियाणि सात्त्विका-

गुणपरिणामविशेषान्नानात्वं वाह्यभेदाश्च ॥ २७ ॥

ङ्कृताद्दङ्कारादुत्पन्नानि । तत्र मनसः का वृत्तिरिति ? सङ्कल्पो वृत्तिः, बुद्धीन्द्रियाणां शब्दादयो वृत्तयः, कर्मेन्द्रियाणां वचनादय । अथैतानीन्द्रियाणि भिन्नानि भिन्नार्थग्राहकाणि किमीश्वरेण उत स्वभावेन कृतानि ? यतः प्रधानबुद्ध्यहङ्कारा अचेतनाः पुरुषोऽप्यकर्त्तेति । अत्राह—इह साङ्ख्यानां स्वभावो नाम कश्चित् कारणमस्ति । अत्रोच्यते—गुणपरिणामविशेषान्नानात्वं वाह्यभेदाश्च—इमान्येकादशेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धाः पञ्चानां वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां सङ्कल्पश्च मनसः; एवमेते भिन्नानामेवेन्द्रियाणामर्थाः, गुणपरिणामविशेषात्—गुणानां परिणामो गुणपरिणामस्तस्य विशेषादिन्द्रियाणां नानात्वं वाह्यार्थभेदाश्च । अथैतन्नानात्वं नेश्वरेण नाहङ्कारेण न बुद्ध्या न प्रधानेन न पुरुषेण, स्वभावात् कृतगुणपरिणामेनेति । गुणानामचेतनत्वान्न प्रवर्त्तन्ते ? प्रवर्त्तन्त एव । कथम् ? उच्यतेऽत्र—*"वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥" एवमचेतना गुणा एकादशेन्द्रियभावेन प्रवर्त्तन्त, विशेषोऽपि तत्कृत एव, येनोच्चैः प्रदेशे चक्षुरवलोकनाय स्थित, तथा घ्राण तथा श्रोत्र तथा जिह्वा स्वदेशे स्वार्थग्रहणाय । एव कर्मेन्द्रियाण्यपि यथायथ स्वार्थसमर्थानि स्वदेशावास्थितानि स्वभावतो गुणपरिणामविशेषादेव, न तदर्थां अपि, यत उक्तं शास्त्रान्तरे—"गुणाः गुणेषु वर्त्तन्ते" गुणाना या वृत्तिः सा गुणविषया एवेति वाह्यार्थो विज्ञेया गुणकृता एवेत्यर्थः, प्रधानं यस्य कारणमिति ॥ २७ ॥

---

* सप्तपञ्चाशत्सङ्ख्यककारिका द्रष्टव्या ।

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥२८॥
स्वालक्षण्या वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥२९॥

अथेन्द्रियस्य कस्य का वृत्तिरित्युच्यते—मात्रशब्दो विशेषार्थः । अविशेषव्यावृत्त्यर्थो यथा—भिक्षामात्रं लभ्यते, नान्यो विशेष इति। तथा चक्षुः रूपमात्रे न रसादिषु,एवं शेषाण्यपि, तद्यथा—चक्षुषो रूप, जिह्वाया रस , घ्राणस्य गन्धः, श्रोत्रस्य शब्द , त्वचः स्पर्शः । एवमेषां बुद्धीन्द्रियाणा वृत्ति. कथिता । कर्मेन्द्रियाणा वृत्तिः कथ्यते—वचनादानविहरणोत्सर्गानन्दाश्च पञ्चाना कर्मेन्द्रियाणामित्यर्थ । वाचो वचनं, हस्तयोरादानं, पादयोर्विहरण, गायोर्मुक्तस्याहारस्य परिणतमलोत्सर्ग , उपस्थस्यानन्द. सुतोत्पत्तिविषया वृत्तिरिति सम्बन्धः ॥ २८ ॥

अधुना बुद्ध्यहङ्कारमनसामुच्यते—स्वलक्षणस्वभावा स्वालक्षण्या । अध्यवसायो बुद्धिरिति लक्षणमुक्त सैव बुद्धिवृत्तिः । तथाऽभिमानोऽहङ्कार इत्यभिमानलक्षणोऽभिमानवृत्तिश्च । सङ्कल्पकं मन इति लक्षणमुक्त, तेन सङ्कल्प एव मनसो वृत्तिः । त्रयस्य बुद्ध्यहङ्कारमनसा स्वालक्षण्या वृत्तिरसामान्या, या प्रागभिहिता बुद्धीन्द्रियाणाञ्च वृत्तिः साऽप्यसामान्यैवेति । इदानीं सामान्या वृत्तिराख्यायते, सामान्यकरणवृत्ति ,—सामान्येन करणाना वृत्ति', प्राणाद्याः वायवः पञ्च—प्राणापानसमानोदानव्याना इति पञ्च वायव. सर्वेन्द्रियाणा सामान्या वृत्तिः, यतः, प्राणो नाम वायुर्मुखनासिकान्तर्गोचरः, तस्य यत् स्पन्दनं

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे, तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥३०॥

कर्म तत् त्रयोदशविधस्यापि सामान्या वृत्ति, मति प्राणे यस्मात् करणानामात्मलाभ इति । प्राणोऽपि पञ्जरशकुनिवत् सर्वस्य चलन करोतीति, प्राणनात् प्राण इत्युच्यते । तथाऽपनयनादपानः, तत्र यत् स्पन्दनं तदपि सामान्यवृत्तिरिन्द्रियस्य । तथा समानो मध्यदेशवर्त्ती, य आहारादीना समं नयनात् समानो वायु, तत्र यत् स्पन्दनं तत् सामान्यकरणवृत्ति. । तथा ऊर्ध्वारोहणादुत्कर्षादुन्नयनाद्वा उदानो नाभिदेशमस्तकान्तर्गोचर, तत्रोदाने यत् स्पन्दन तत् सर्वेन्द्रियाणा सामान्या वृत्ति' । किञ्च, शरीरव्यापिरभ्यन्तरविभागश्च येन क्रियतेऽसौ शरीरव्याप्याकाशवत् व्यान, तत्र यत् स्पन्दन तत् करणजालस्य सामान्या वृत्तिरिति । एवमेते पञ्च वायवः सामान्यकरणवृत्तिरिति व्याख्याता, त्रयोदशविधस्यापि करण सामान्या वृत्तारत्यथ. ॥ २९ ॥

युगपच्चतुष्टयस्य—बुद्ध्यहङ्कारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टय भवति। चतुष्टयस्य दृष्टे प्रतिविषयाध्यवसाये युगपद्वृत्ति, बुद्ध्यहङ्कारमनश्चक्षूषि युगपदेककालं रूपं पश्यन्ति स्थाणुरय-मिति । बुद्ध्यहङ्कारमनोजिह्वा युगपद्रसं गृह्णन्ति । बुद्ध्यहङ्कार-मनोघ्राणानि युगपद्गन्धं गृह्णन्ति । तथा त्वक्-श्रोत्रे अपि । किञ्च, क्रमशश्च तस्य निर्दिष्टा—तस्येति चतुष्टयस्य क्रमशश्च वृत्तिर्भवति ; यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा स्थाणु-रय पुरुषो वेति संशये सति तत्रोपरूढ तार्क्षङ्गं पश्यति शकुनिं वा. ततस्तस्य मनसा सङ्कल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति स्थाणुरयमिति, अतोऽहङ्कारस्य निश्चयार्थे. स्थाणुरेव, इत्येवं

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम् ।
पुरुषार्थ एव हेतुर्न केनचित् कार्य्यते करणम् ॥३१॥
करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।
कार्य्यञ्च तस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च ॥३२॥

बुद्ध्यहङ्कारमनश्चक्षुषा क्रमशो वृत्तिर्दृष्टा ; यथा रूपे तथा शब्दादिष्वपि बोद्धव्या । दृष्टे दृष्टविषये । किञ्चान्यत्, तथाऽप्यदृष्टे त्रयस्य तत्पूर्विका वृत्ति',—अदृष्टेऽनागतेऽतीते च काले बुद्ध्यहङ्कारमनसां रूपे चक्षु पूर्विका त्रयस्य वृत्तिः, स्पर्शे त्वक्पूर्विका, गन्धे घ्राणपूर्विका, रसे रसनपूर्विका, शब्दे श्रवणपूर्विका, बुद्ध्यहङ्कारमनसामनागते भविष्यति कालेऽतीते च तत्पूर्विका क्रमशो वृत्तिः, वर्त्तमाने युगपत् क्रमशश्चेति ॥३०॥

किञ्च,स्वा स्वामिति वीप्सा,बुद्ध्यहङ्कारमनांसि स्वा स्वां वृत्तिं परस्पराकूतहेतुकाम्—आकूतकादरसम्भ्रमः इति प्रतिपद्यन्ते पुरुषार्थकरणाय बुद्ध्यहङ्कारादय', बुद्ध्यहङ्काराकूत ज्ञात्वा स्वविषयं प्रतिपद्यते, किमर्थमिति चेत् पुरुषार्थ एव हेतुः, पुरुषार्थः कर्त्तव्य इत्येवमर्थं गुणाना प्रवृत्तिः, तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति, यद्यचेतनानीति कथं स्वयं प्रवर्त्तन्ते ? न केनचित् कार्य्यते करण—पुरुषार्थ एवैकः कारयतीति वाक्यार्थः, न केनचित्—ईश्वरेण पुरुषेण वा कार्य्यते प्रबोध्यते करणम् ॥ ३१ ॥

बुद्ध्यादि कतिविध तदित्युच्यते—करण त्रयोदशविधं बोद्धव्य, महदादि. पञ्च बुद्धीन्द्रियाणि चक्षुरादीनि. पञ्च कर्मेन्द्रियाणि वागादीनीति त्रयोदशविधं करणम्। तत् किं करोतीत्येतदाह—तदाहरणधारणप्रकाशकरं—तत्राहरण धारणञ्च

अन्तःकरणं त्रिविधं दशधा बाह्यं च यस्य विषयाख्यम्।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥३३॥

कर्मेन्द्रियाणि कुर्वन्ति, प्रकाश्य बुद्धीन्द्रियाणि। कतिविधं कार्यं तस्येति तदुच्यते—कार्यञ्च तस्य दशधा—तस्य करणस्य कार्यं कर्त्तव्यमिति दशधा दशप्रकारं, शब्दस्पर्श-रूपरसगन्धाख्यं वचनादानविहरणोत्सर्गानन्दाख्यमेतद्दशविधं कार्यं, बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ॥ ३२ ॥

किञ्च, अन्तःकरणमिति—बुद्ध्यहङ्कारमनांसि, त्रिविधं महदादिभेदात्। दशधा बाह्यञ्च—बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च दशविधमेतत् करण बाह्यम; तत्र यस्यान्तःकरणस्य विषयाख्यं बुद्ध्यहङ्कारमनसा भोग्यं, साम्प्रतकाल—श्रोत्र वर्त्तमान-मेव शब्द शृणोति नातीत न च भविष्यन्तम्। चक्षुरपि वर्त्तमानं रूपं पश्यति नातीत नानागतम्। त्वक् वर्त्तमानं स्पर्शम्। जिह्वा वर्त्तमानं रसम्। नासिका वत्तमानं गन्धम; नातीतानागतञ्चेति। एवं कर्मेन्द्रियाणि, वाक् वर्त्तमान शब्दमुच्चारयति नातीतं नानागतम्। पाणौ वर्त्तमान घटमाददाति नातीतमनागतञ्च। पादौ वर्त्तमान पन्थान विहरतो नातीतं नाप्यनागतम्। पायूपस्थौ च वर्त्तमानावुत्सर्गानन्दौ कुरुतो नातीतौ नानागतौ। एव बाह्य करण साम्प्रतकालमुक्तम्। त्रिकालमाभ्यन्तर करणं —बुद्ध्यहङ्कारमनांसि त्रिकालविषयाणि, बुद्धिर्वर्त्तमानं घटं बुध्यते, अतीतमनागतञ्चेति। अहङ्कारो वर्त्तमानेऽभिमानं करोत्यतीतेऽनागते च। तथा मनो वर्त्तमाने सङ्कल्प कुरुते-ऽतीतेऽनागते च, एवं त्रिकालमाभ्यन्तरं करणमिति ॥ ३३ ॥

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।
वाक् भवति शब्दविषया शेषाणि तु पञ्चविष-
याणि ॥३४॥

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि॥३५॥
एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।

इदानीमिन्द्रियाणि कति सविशेष विषय गृह्णन्ति, कानि निर्विशेषमिति तदुच्यते—बुद्धीन्द्रियाणि तेषा सविशेषं विषयं गृह्णन्ति, सविशेषविषय मानुषाणा, शब्दस्पर्शरूपरसगन्धान् सुखदु खमाहविषययुक्तान् बुद्धीन्द्रियाणि प्रकाशयन्ति । देवानां निर्विशेषान् विषयान् प्रकाशयन्ति । तथा कर्मेन्द्रियाणा मध्ये वाक् भवति शब्दविषया, देवाना मानुषाणाञ्च वाक् वदति श्लोकादीनुच्चारयति, तस्माद्देवाना मानुषाणाञ्च वागिन्द्रिय तुल्य, शेषाण्यपि वाग्व्यतिरिक्तानि पाणिपादपायूपस्थसंज्ञितानि पञ्चविषयाणि—पञ्च विषया शब्दादया येषा तानि पञ्च-विषयाणि शब्दस्पर्शरूपरसगन्धाः पाणौ सन्ति, पञ्चशब्दादि-लक्षणाया भुवि पादा विहरति, पायुरिन्द्रियं पञ्चलक्षमुत्सर्गं * करोति, तथोपस्थेन्द्रिय पञ्चलक्षणं शुक्रमानन्दयति ॥ ३४ ॥

सान्त.करणा बुद्धि अहङ्कारमनःसहितेत्यर्थः, यस्मात् सर्वं विषयमवगाहते गृह्णाति, त्रिष्वपि कालेषु शब्दादीन् गृह्णाति, तस्मात् त्रिविधं करणं द्वार, द्वाराणि शेषाणि, करणानीति वाक्यशेष ॥ ३५ ॥

किञ्चान्यत्, यानि करणान्युक्तानि एते गुणविशेषाः, किं

* पञ्चलक्षणमुत्सर्गमिति पाठान्तरम ।

कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥३६॥
सर्वं प्रत्युपभोग यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं
सूक्ष्मम् ॥३७॥
तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥३८॥

विशिष्टा १ प्रदीपकल्पा प्रदीपवद्विषयप्रकाशका, परस्पर-विलक्षणा असदृशा भिन्नविषया इत्यर्थं । गुणविशेषा इति—गुणविशेषा गुणेभ्यो जाता । कृत्स्नं पुरुषस्यार्थं बुद्धीन्द्रियाणि कर्मेन्द्रियाण्यहङ्कारो मनश्चैतानि स्व स्वमर्थं पुरुषस्य प्रकाश्य बुद्धौ प्रयच्छन्ति बुद्धिस्थं कुर्वन्तीत्यर्थं.। यतो बुद्धिस्थं सर्वं विषयसुखादिकं पुरुष उपलभ्यते ॥ ३६ ॥

इदञ्चान्यत्, सर्वेन्द्रियगतं त्रिष्वपि कालेषु सर्वं प्रत्युपभोगमुपभोगं प्रति देवमनुष्यतिर्य्यग्बुद्धीन्द्रियकर्मेन्द्रियद्वारेण सान्त.करणा बुद्धि' साधयति सम्पादयति यस्मात्, तस्मात् सैव च विशिनष्टि—प्रधानपुरुषयोर्विषयविभाग करोति, प्रधान-पुरुषान्तरं नानात्वमित्यर्थं:, सूक्ष्ममित्यनधिकृततपश्चरणैर-प्राप्यम्, इयं प्रकृतिः सत्त्वरजस्तमसा साम्यावस्था इयं बुद्धिरय-महङ्कारः, एतानि पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्चमहा-भूतान्ययमन्यः पुरुष एभ्यो व्यतिरिक्त इत्येवं बोधयति बुद्धिः, यस्यावापादपवर्गो भवति ॥ ३७ ॥

पूर्वमुक्त विशेषाविशेषविषयाणि, तत् के विषयास्तान् दर्श-यति—यानि पञ्च तन्मात्राण्यहङ्कारादुत्पद्यन्ते ते शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्र रसतन्मात्रं गन्धतन्मात्रमेतान्यविशेषा उच्यन्ते,देवानामिते सुखलक्षणा विषया दुःखमोहरहिताः, तेभ्यः

सूक्ष्मा मातापित्रजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः।
सूक्ष्मास्तेषां नियता मातापित्रजा निवर्त्तन्ते ॥३९॥

पञ्चभ्यस्तन्मात्रेभ्य पञ्चमहाभूतानि पृथिव्यप्तेजोवायुाकाश-मज्ञानि यान्युत्पद्यन्ते एते स्मृता विशेषाः। गन्धतन्मात्रात् पृथिवौ, रसतन्मात्रादापः, रूपतन्मात्रात् तेजः, स्पर्शतन्मात्रा-द्वायु, शब्दतन्मात्रादाकाशम्, इत्येवमुत्पन्नान्येतानि महाभूता-न्येते विशेषा मानुषाणा विषया शान्ता सुखलक्षणा, घोरा दुःखलक्षणाः, मूढा मोहजनकाः। यथाऽऽकाश कस्यचिदनव काशादन्तर्गृहादेर्निर्गतस्य सुखात्मक शान्त भवति, तदेव शीतोष्णवातवर्षाभिभूतस्य दुःखात्मक घोरं भवति, तदेव पन्थानं गच्छतो वनमार्गात् भ्रष्टस्य दिङ्मोहान्मूढं भवति। एव वायु-र्घर्मार्त्तस्य शान्तो भवति, शीतार्त्तस्य घोरो धूलीशर्करादिमिश्रो-ऽतिवान् मूढ इति। एवं तेजःप्रभृतिषु द्रष्टव्यम् ॥ ३८ ॥

अथान्ये विशेषाः,सूक्ष्माः,—तन्मात्राणि यत् सङ्गृहीतं तन्मा-त्रकं सूक्ष्मशरीरं महदादिलिङ्गं सदा तिष्ठति सस्रति च, ते सूक्ष्माः, तथा मातापित्रजा,—स्थूलशरीरोपचायका ऋतुकाले मातापित्रसयोगे शोणितशुक्रमिश्रीभावेनोदरान्तः सूक्ष्म-शरीरस्योपचयं कुर्वन्ति, तत् सूक्ष्मशरीरं पुनर्मातुरशितपीत-नानाविधरसेन नाभिनिबन्धेनाप्यायते, तथाप्यारब्धं शरीरं सूक्ष्मैर्मातापित्रजैश्च सह * महाभूतैस्त्रिधा विशेषैः, पृष्ठोदरजङ्घा-कट्युरःशिर प्रभृतिषाट्कौशिकं पाञ्चभौतिकं रुधिरमास-स्नायुशुक्रास्थिमज्जासम्भृतम् आकाशोऽवकाशदानाद्वायुर्वहनात् तेजः पाकादापः सङ्ग्रहात् पृथिवी धारणात् समस्तावयवोपेतं मातुरुदरात् बहिर्भवति; एवमेते त्रिविधा विशेषाः स्युः।

---

* अत्र महाभूतशब्दः मूलोक्तप्रभूतार्थकः,प्रकृष्टे, महति भूते, प्रभूते, महाभूतैरित्यर्थः।

पूर्वोत्पन्नमसक्तं नियतं महदादिसूक्ष्मपर्य्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥४०॥

अत्राह—के नित्याः के वा अनित्याः ? सूक्ष्मास्तेषां नियताः,—सूक्ष्मास्तन्मात्रसञ्ज्ञकास्तेषा मध्ये नियता नित्याः, तैरारब्धं शरीरं कर्मवशात् * पशुमृगपक्षिसरीसृपस्थावरजातिषु संसरति, धर्मवशादिन्द्रादिलोकेषु, एवमेतन्नियतं सूक्ष्मशरीरं संसरति न यावत् ज्ञानमुत्पद्यते, उत्पन्ने ज्ञाने विद्वान् शरीरं त्यक्त्वा मोक्षं गच्छति, तस्मादेते विशेषा सूक्ष्मा नित्या इति। मातापित्रजा निवर्त्तन्ते—तत् सूक्ष्मशरीरं परित्यज्यैव प्राणत्यागवेलायां मातापित्रजा निवर्त्तन्ते, मरणकाले मातापित्रज शरीरमिहैव निवृत्य भूम्यादिषु प्रलीयते यथातत्त्वम् ॥ ३९ ॥

सूक्ष्मश्च कथं ससरति ? तदाह—यदा लोका अनुत्पन्नाः प्रधानादिसर्गे तदा सूक्ष्मशरीरमुत्पन्नमिति। किञ्चान्यत्, असक्तं—न सयुक्तं तिर्य्यग्योनिदेवमानुषस्थानेषु, सूक्ष्मत्वात् कुत्रचिदसक्त पर्वतादिषु अप्रतिहतप्रसरं ससरति गच्छति। नियतं—यावन्न ज्ञानमुत्पद्यते तावत् संसरति। तच्च महदादिसूक्ष्मपर्य्यन्तं—महानादौ यस्य तन्महदादि, बुद्धिरहङ्कारो मन इति पञ्चतन्मात्राणि सूक्ष्मपर्य्यन्तं तन्मात्रपर्य्यन्त संसरति शूलग्रहपिपीलिकावत् त्रीनपि लोकान्। निरुपभोगं—भोगरहितं तत् सूक्ष्मशरीरं मातापित्रजेन वाह्येनोपचयेन क्रियाधर्मग्रहणाङ्गोगेषु समर्थं भवतीत्यर्थः। भावैरधिवासित—पुरस्ताद्भावान् † धर्मादीन् वक्ष्याम, तैरधिवासितमुपरञ्जितम्। लिङ्गमिति—प्रलयकाले महदादिसूक्ष्मपर्य्यन्तं करणोपेत प्रधाने

---

* शरीरमधर्मवशादिति पाठान्तरम्।

† चत्वारिंशत्सप्तकारिका द्रष्टव्या।

चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥४१॥
पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन।
प्रकृतेर्विभुत्वयोगान्नटवत् व्यवतिष्ठते लिङ्गम् ॥४२॥

लीयते, असंसरणयुक्तं सत् आ सर्गकालमव वर्त्तते, प्रकृतिमोह-बन्धनबद्ध सत् संसरणादिक्रियासु समर्थमिति; पुनः सर्ग-काले संसरति तस्माल्लिङ्ग सूक्ष्मम् ॥ ४० ॥

किं प्रयोजनेन त्रयोदशविधं करणं संसरति? इत्येव चोदिते सत्याह—चित्रं यथा कुड्याद्याश्रयमृते न तिष्ठति, स्थाण्वादिभ्यः कीलकादिभ्यो विना यथा छाया न तिष्ठति, तैर्विना न भवति; आदिग्रहणात् यथा—शैत्य विना नापो भवन्ति शैत्य वाऽग्नि-र्विना, अग्निरुष्ण विना वायु स्पर्शं विना आकाशमवकाशं विना पृथिवी गन्धं विना, तद्वदेतेन दृष्टान्तेन न्यायेन विना विशेषैरविशेषैस्तन्मात्रैर्विना न तिष्ठति। अथ विशेषभूतान्यु-च्यन्ते—शरीरं पञ्चभूतमयं, वैशेषिणा शरीरेण विना क्व लिङ्ग स्थानञ्चेति क्व एकदेहमुज्झति तदेवान्यमाश्रयति, निराश्र-यमाश्रयरहितं, लिङ्गं त्रयोदशविधं करणमित्यर्थः ॥ ४१ ॥

किमर्थम्? तदुच्यते—पुरुषार्थः कर्त्तव्य इति प्रधानं प्रवर्त्तते, स च द्विविध, शब्दाद्युपलब्धिलक्षणो गुणपुरुषान्तरोप-लब्धिलक्षणश्च। शब्दाद्युपलब्धिर्ब्रह्मादिषु लोकेषु गन्धादि-भोगावाप्ति। गुणपुरुषान्तरोपलब्धिर्मोक्ष इति। तस्मादुक्त—"पुरुषार्थहेतुकमिदं सूक्ष्मशरीर प्रवर्त्तते" इति। निमित्त-नैमित्तिकप्रसङ्गेन—निमित्तं धर्मादि, नैमित्तिकमूर्द्वगमनादि, पुरस्तादेव वक्ष्यामः, प्रसङ्गेन प्रसक्त्या, प्रकृते. प्रधानस्य, विभुत्व-

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृतिकाश्च धर्माद्याः।
दृष्टाः करणाश्रयिणः कार्य्याश्रयिणश्च काललाद्याः॥४३॥

योगात्—यथा राजा स्वराष्ट्रे विभुत्वात् यद्यदिच्छति तत् तत् करोतीति, तथा प्रकृतेः सर्वत्र विभुत्वयोगान्निमित्तनैमित्तिकप्रसङ्गेन व्यवतिष्ठते पृथक् पृथग्देहधारणे लिङ्गस्य व्यवस्था करोति। लिङ्गं सूक्ष्मै. परमाणुभिस्तन्मात्रैरुपचित शरीरं त्रयोदशविधकरणोपेतं मानुषदेवतिर्य्यग्योनिषु व्यवतिष्ठते। कथम्? नटवत्—यथा नट. पटान्तरेण प्रविश्य देवो भूत्वा निर्गच्छति पुनर्मानुषः पुनर्विदूषकः, एवं लिङ्गं निमित्तनैमित्तिकप्रसङ्गेनोदरान्तः प्रविश्य हस्तौ स्त्री पुमान् भवति॥ ४२॥

भावैरधिवासित लिङ्गं संसरतीत्युक्तम्; * तत् के भावा इत्याह—भावास्त्रिविधाश्चिन्त्यन्ते, सांसिद्धिका', प्राकृता., वैकृताश्च। तत्र सांसिद्धिका यथा—भगवतः कपिलस्यादिसर्गे उत्पद्यमानस्य चत्वारो भावाः सहोत्पन्ना., धर्मो ज्ञानं वैराग्यमैश्वर्य्यमिति। प्राकृताः कथ्यन्ते,—ब्रह्मणश्चत्वारः पुत्रा. सनक-सनन्द-सनातन-सनत्कुमारा बभूवु', तेषामुत्पन्नकार्य्यकारणानां शरीरिणां षोड़शवर्षाणामिते भावाश्चत्वारः समुत्पन्नाः, तस्मादिते प्राकृताः। तथा वैकृता यथा,—आचार्य्यमूर्त्तिं निमित्तं कृत्वा अस्मदादीनां ज्ञानमुत्पद्यते, ज्ञानाद्वैराग्यं, वैराग्याद्धर्मः, धर्माद्ऐश्वर्य्यमिति। आचार्य्यमूर्त्तिरपि विकृतिरिति, तस्माद्वैकृता एते भावा उच्यन्ते, यैरधिवासित लिङ्गं ससरति। एते चत्वारो भावा. सात्त्विकाः, तामसा विपरीताः, "सात्त्विकमेतद्रूपं तामसमस्मात्

---

* चत्वारिंशत्सङ्ख्यककारिका द्रष्टव्या।

धर्मेण गमनमूर्द्धं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥ ४४ ॥
वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ।

विपर्ययस्तम्" * इत्यत्र व्याख्याता । एवमष्टौ धर्मो ज्ञानं वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यमित्यष्टौ भावा', क्व वर्त्तन्ते ? दृष्टाः करणाश्रयिणः,—बुद्धिः करणं तदाश्रयिणः ; एतदुक्तम्—"अध्यवसायो बुद्धिर्धर्मो ज्ञानम्" इति । † कार्य्य देहस्तदाश्रयाः कललाद्या', ये माढजा इत्युक्ता' शुक्रशोणितसंयोगे विवृद्धिहेतुका. कललाद्या',—बुद्बुदमांसपेशीप्रभृतय', तथा कौमारयौवनस्थविरत्वादयो भावा अन्नपानरसनिमित्ता निष्पद्यन्ते, अतः कार्य्याश्रयिण उच्यन्ते, अन्नादिविषयभोगनिमित्ता जायन्ते ॥४३॥

निमित्तनैमित्तिकप्रसङ्गेनेति यदुक्तमत्रोच्यते ‡—धर्मेण गमनमूर्द्धं—धर्मं निमित्तं कृत्वोर्द्धमुपनयति ; ऊर्द्धमित्यष्टौ स्थानानि गृह्यन्ते, तद्यथा—ब्राह्म प्राजापत्यं सौम्यमैन्द्रं गान्धर्वं याक्ष राक्षसं पैशाचमिति. तत् सूक्ष्मं शरीरं गच्छति । पशुमृगपक्षिसरीसृपस्थावरान्तेष्वधर्मो निमित्तम् । किञ्च, ज्ञानेन चापवर्ग ,—अपवर्गश्च पञ्चविंशतितत्त्वज्ञानं, तेन निमित्तेनापवर्गो मोक्षः, तत सूक्ष्मं शरीर निवर्त्तते, परमात्मा उच्यते । विपर्ययादिष्यते बन्धः,—अज्ञानं निमित्तं, स चैष नैमित्तिक. प्राकृतो वैकारिको दाक्षिणिकश्च बन्ध इति वक्ष्यति पुरस्तात्, यदिदमुक्तं—"प्राकृतेन च बन्धेन तथा वैकारिकेण च। दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते ॥" ॥ ४४ ॥

तथाऽन्यदपि निमित्तं—यथा कस्यचिद्वैराग्यमस्ति न

---

* त्रयोविंशतिसङ्ख्यककारिका द्रष्टव्या ।

† अत्रापि त्रयोविंशतिसङ्ख्यककारिका द्रष्टव्या ।

‡ त्रिचत्वारिंशत्सङ्ख्यककारिका द्रष्टव्या ।

ऐश्वर्य्यादविघाता विपर्य्ययात् तद्विपर्य्यासः ॥४५॥
एष प्रत्ययसर्गो विपर्य्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्दात् तस्य च भेदास्तु पञ्चाशत् ॥४६॥

तत्त्वज्ञानं, तस्मादज्ञानपूर्वाद्वैराग्यात् प्रकृतिलयः,—मृतोऽष्टासु प्रकृतिषु प्रधानबुद्ध्यहङ्कारतन्मात्रेषु लीयते न मोक्षः ; ततो भूयोऽपि संसरति । तथा योऽयं राजसो रागः,—यजामि दक्षिणां ददामि, येनामुष्मिन् लोकेऽत्र यद्दिव्यं मानुष सुखमनुभवाम्येतत्माद्राजसाद्रागात् संसारो भवति । तथा ऐश्वर्य्यादविघात,—एतदैश्वर्य्यमष्टगुणमणिमादियुक्तं, तस्मादैश्वर्य्यनिमित्तादविघातो नैमित्तिको भवति ब्राह्मादिषु स्थानेष्वैश्वर्य्यं न विहन्यते । किञ्चान्यत्, विपर्य्ययात् तद्विपर्य्यास',—तस्यार्विघातस्य विपर्य्यासो विघातो भवति, अनैश्वर्य्यात् सर्वत्र विहन्यते ॥४५॥

एष निमित्तै सह नैमित्तिकः षोडशविधो व्याख्यात, स कियात्मक इत्याह—यथा एष षोडशविधो निमित्तनैमित्तिकभेदो व्याख्यात एष प्रत्ययसर्ग उच्यते । प्रत्ययो बुद्धिरित्युक्ता, अध्यवसायो बुद्धिर्धर्मो ज्ञानमित्यादि । स च प्रत्ययसर्गश्चतुर्धा भिद्यते, विपर्य्ययाशक्तितुष्टिसिद्ध्याख्यभेदात् । तत्र संशयोऽज्ञानं विपर्य्ययः ; यथा कस्यचित् स्थाणुदर्शने स्थाणुरय पुरुषो वेति संशयः । अशक्तिर्यथा—तमेव स्थाणुं सम्यक् दृष्ट्वा संशयं छेत्तुं न शक्नोतीत्यशक्तिः । एवं तृतीयस्तुष्ट्याख्यो यथा—तमेव स्थाणुं ज्ञातुं संशयितुं वा नेच्छति किमनेनास्माकमित्येषा तुष्टिः । चतुर्थः सिद्ध्याख्यो यथा,—आनन्दितेन्द्रियः स्थाणुमारूढा वल्लिं पश्यति शकुनिं वा, तस्य सिद्धिर्भवति स्थाणुरय-मिति । एवमस्य चतुर्विधस्य प्रत्ययसर्गस्य गुणवैषम्यविमर्दात्

पञ्च विपर्य्ययभेदा भवन्त्यशक्तेस्तु करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥४७॥
भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥४८॥

तस्य भेदास्तु पञ्चाशत्, योऽयं सत्त्वरजस्तमोगुणाना वैषम्यं विमर्दः तेन तस्य प्रत्ययसर्गस्य पञ्चाशद्भेदा भवन्ति ॥ ४६ ॥

तथा क्वापि सत्त्वमुत्कट भवति रजस्तमसौ उदासीने, क्वापि रजः क्वापि तम इति भेदाः कथ्यन्ते, पञ्च विपर्य्ययभेदाः,—ते यथा—तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति, एषां भेदाना नानात्वं वक्ष्यतेऽनन्तरमेवेति । अशक्तेस्त्वष्टाविंशतिभेदा भवन्ति करणवैकल्यात्, तानपि वक्ष्यामः । तथा तुष्टिर्नवधा —ऊर्द्ध्वस्रोतसि राजसानि ज्ञानानि । तथाऽष्टविधा सिद्धिः,—सात्त्विकानि ज्ञानानि, तत्रैवोर्द्ध्वस्रोतसि ॥ ४७ ॥

एतत् क्रमेणैव वक्ष्यते, तत्र विपर्य्ययभेदा उच्यन्ते—तमस्तावदष्टधा भेदः प्रलयोऽज्ञानाद्विभज्यते, सोऽष्टासु प्रकृतिषु लीयते प्रधानबुद्ध्यहङ्कारपञ्चतन्मात्राख्यासु, तत्र लीनमात्मानं मन्यते मुक्तोऽहमिति तमोभेद एषः । अष्टविधस्य मोहस्य भेदोऽष्टविध एवेत्यर्थः, यत्राष्टगुणमणिमाद्यैश्वर्य्यं तत्र सङ्गादिन्द्रादयो देवा न मोक्ष प्राप्नुवन्ति, पुनश्च तत्क्षये ससरन्त्येषोऽष्टविधो मोह इति। दशविधो महामोहः,—शब्दस्पर्शरूपरसगन्धा देवानामेते पञ्च विषयाः सुखलक्षणाः, मानुषाणामप्येत एव शब्दादयः पञ्च विषयाः, एवमेतेषु दशसु महामोह इति। तामिस्रोऽष्टादशधा—अष्टविधमैश्वर्य्यं, दृष्टानुश्रविका विषया दश, एतेषामष्टादशाना सम्पदमनुनन्दन्ति विपदं नानुमोदन्ते, एषोऽष्टादशविधो विकल्पस्तामिस्रः । यथा तामिस्रोऽष्टगुण-

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदशवधा बुद्धेर्विपर्य्ययात् तुष्टिसिद्धीनाम् ॥४९॥
आध्यात्मिकयश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः ।

मैश्वर्यं दृष्टानुश्रविका दश विषयास्तथाऽन्धतामिस्रोऽप्यष्टादश-भेद एव । किन्तु विषयसम्पत्तौ सभोगकाले य एव म्रियतेऽष्टगुणैश्वर्याद्वा भ्रश्यते ततस्तस्य महद्दुःखमुत्पद्यते सोऽन्धतामिस्र इति । एवं विपर्य्ययभेदास्तमःप्रभृतय. पञ्च प्रत्येकं भिद्यमाना द्विषष्टिभेदा. संवृत्ता इति ॥ ४८ ॥

अशक्तिभेदाः कथ्यन्ते—भवन्त्यशक्तेश्च करणवैकल्यादष्टाविंशतिभेदा इत्युद्दिष्ट, तत्रैकादशेन्द्रियवधाः,—बाधिर्य्यमन्धता प्रसुप्तिरुपजिह्विका घ्राणपाको मूकता कुणित्व खाञ्ज्य गुदावर्त्तः श्लैव्यमुन्माद इति । सह बुद्धिवधैरशक्तिरुद्दिष्टा—ये बुद्धिवधास्तैः सहाशक्तेरष्टाविंशतिभेदा भवन्ति । सप्तदश वधा बुद्धे.,—सप्तदश वधास्ते तुष्टिभेद-सिद्धिभेदवैपरीत्येन, तुष्टिभेदा नव, सिद्धिभेदा अष्टौ ये, तद्विपरीतैः सह एकादशवधा एवमष्टाविंशतिविकल्पा अशक्तिरिति ॥ ४९ ॥

विपर्य्ययात् तुष्टिसिद्धीनामेव भेदक्रमो द्रष्टव्यः । तत्र तुष्टिर्नवधा कथ्यते, आध्यात्मिकयश्चतस्रस्तुष्टय',—अध्यात्मनि भवा आध्यात्मिक्य, ताश्च प्रकृत्युपादानकालभाग्याख्या. । तत्र प्रकृत्याख्या यथा—कश्चित् प्रकृतिं वेत्ति तस्याः सगुणनिर्गुणत्वञ्च, तेन तत्त्वं तत्कार्य्यं विज्ञायैव केवल तुष्टस्तस्य नास्ति मोक्ष एषा प्रकृत्याख्या । उपादानाख्या यथा—कश्चिदविज्ञायैव तत्त्वान्युपादानग्रहण करोति चिदण्डकमण्डलुविविदिषाभ्यो मोक्ष इति, तस्यापि नास्ति मोक्ष', इति एषा उपादानाख्या । तथा कालाख्या—कालेन मोक्षो भविष्यतीति किं तत्त्वाभ्यासेनेत्येषा

वाह्या विषयोपरमात्पञ्च नव तुष्टयोऽभिमताः ॥५०॥
ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः।

कालाख्या तुष्टिस्तस्य नास्ति मोक्ष इति। तथा भाग्याख्या—भाग्येनैव मोक्षो भविष्यतीति भाग्याख्या, चतुर्था तुष्टिरिति। वाह्या विषयोपरमात् पञ्च—वाह्यास्तुष्टयः पञ्च विषयोपरमात्, शब्दस्पर्शरूपरसगन्धेभ्य उपरतोऽर्जनरक्षणक्षयसङ्गहिंसादर्शनात्। वृद्धिनिमित्तं पाशुपाल्यवाणिज्यप्रतिग्रहसेवाः कार्याः, एतदर्जनं दुःखम्। अर्जितानां रक्षणे दुःखम्। उपभोगात् क्षीयते इति क्षयदुःखम्। तथा विषयोपभोगसङ्गे कृते नास्तीन्द्रियाणामुपशम इति सङ्गदोषः। तथा न अनुपहत्य भूतान्युपभोगइत्येष हिंसादोषः। एवमर्जनादिदोषदर्शनात् पञ्चविषयोपरमात् पञ्च तुष्टयः। एवमाध्यात्मिकवाह्यभेदान्नव तुष्टयः, तासां नामानि शास्त्रान्तरे प्रोक्तानि—"अम्भः सलिलं मेघो वृष्टिः सुतमः पारं सुनेत्रं नारीकमनुत्तमाम्भसिकम्" इति। आसां तुष्टीनां विपरीता अशक्तिभेदात् बुद्धिवधा भवन्ति, तद्यथा—अनम्भोऽसलिलममेघ इत्यादिवैपरीत्यात् बुद्धिवधा इति ॥५०॥

सिद्धिरुच्यते, ऊहो यथा—"कश्चिन्नित्यमूहते किमिह सत्यं किं परं किं नैःश्रेयसं किं कृत्वा कृतार्थः स्याम्" इति चिन्तयतो ज्ञानमुत्पद्यते, प्रधानादन्य एव पुरुषः, इतोऽन्या बुद्धिः, अन्योऽहङ्कारः, अन्यानि तन्मात्राणीन्द्रियाणि पञ्च महाभूतानीत्येवं तत्त्वज्ञानमुत्पद्यते येन मोक्षो भवति, एषा ऊहाख्या प्रथमा सिद्धिः। तथा शब्दज्ञानात् प्रधानपुरुषबुद्ध्यहङ्कारतन्मात्रेन्द्रियपञ्चमहाभूतविषयं ज्ञानं भवति, ततो मोक्ष इत्येषा शब्दाख्या सिद्धिः। अध्ययनात् वेदादिशास्त्राध्ययनात् पञ्चविंशतितत्त्वज्ञानं

दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः॥५१॥
न विना भावैर्लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः ।

प्राप्यते मोक्षं याति इत्येषा तृतीया सिद्धिः । दुःखविघातास्त्रयः, —आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयविघाताय गुरुं समुपगम्य ततः उपदेशान्मोक्षं याति, एषा चतुर्थी सिद्धिः । एषैव दुःखत्रयभेदात् त्रिधा कल्पनीया इति षट् सिद्धय. । तथा सुहृत्प्राप्तिः, यथा—कश्चित् सुहृज्ज्ञानमधिगम्य मोक्षं गच्छति, एषा सप्तमी सिद्धिः । दानं यथा—कश्चिद्गवता प्रत्याश्रयौषधि-विटण्डकुण्डिकादीना ग्रामाच्छादनादीनाञ्च दानेनोपकृत्य तेभ्यो ज्ञानमवाप्य मोक्षं याति, एषा अष्टमी सिद्धिः । आसा-मष्टानां सिद्धीनां शास्त्रान्तरे सञ्ज्ञाः श्रुताः, "तारं सुतारं तारतारं प्रमोद प्रमुदितं प्रमोदमानं रम्यकं सदाप्रमुदितम्" इति । आसां विपर्य्ययात् बुद्धेर्बधा ये विपरीतास्ते अशक्तौ निश्चिप्ता., यथा अतारमसुतारमतारतारमित्यादि द्रष्टव्यम् । अशक्तिभेदा अष्टाविंशतिरुक्ताः, ते सह बुद्धिबधैरेकादशेन्द्रियबधा इति । तत्र तुष्टिविपर्य्यया नव, सिद्धीना विपर्य्यया अष्टौ, एवमेते सप्तदश बुद्धिबधाः, एतैः सहेन्द्रियबधा अष्टाविंशतिरशक्तिभेदाः पश्चात् कथिता इति विपर्य्ययाशक्तितुष्टिसिद्धीनामिवोद्देशो निर्देशश्च कृत इति । किञ्चान्यत्, सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः,—सिद्धेः पूर्वा या विपर्य्ययाशक्तितुष्टयस्ता एव सिद्धेरङ्कुशस्तद्भेदादेव त्रिविध., यथा—हस्ती गृहीताङ्कुशेन वशो भवति, एवं विपर्य्ययाशक्ति-तुष्टिभिर्गृहीतो लोकोऽज्ञानमाप्नोति, तस्मादेताः परित्यज्य सिद्धिः सेव्या, सिद्धेस्तत्त्वज्ञानमुत्पद्यते तस्मान्मोक्ष इति ॥५१॥

अथ यदुक्तं भावैरधिवासितं लिङ्गं, तत्र भावा धर्मादयो-

लिङ्गाख्यो भावाख्यस्तस्माद्द्विविधः प्रवर्त्तते सर्गः ॥५२॥

अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥५३॥
ऊर्द्धं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥ ५४ ॥

ऽष्टावुक्ता बुद्धिपरिणामा., विपर्य्ययाशक्तितुष्टिसिद्धिपरिणताः, स भावाख्यः प्रत्ययसर्ग ,लिङ्गञ्च तन्मात्रसर्गश्चतुर्दशभूतपर्य्यन्त उक्तः, तच्चैकैनैव सर्गेण पुरुषार्थसिद्धौ किमुभयविधसर्गेणेत्यत आह —भावै,—प्रत्ययसर्गैर्विना, लिङ्गं न—तन्मात्रसर्गो न, पूर्वपूर्व-सस्कारादृष्टकारितत्वादुत्तरोत्तरदेहलम्भस्य । लिङ्गेन—तन्मात्र-सर्गेण च विना, भावनिर्वृत्तिर्न, स्थूलसूक्ष्मदेहसाध्यत्वाद्धर्मादेः अनादित्वाच्च सर्गस्य वीजाङ्कुरवदन्याऽन्याश्रयो न दोषाय तत्तज्जातीयापेक्षित्वेऽपि तत्तद्व्यक्तीना परस्परानपेक्षित्वात् ; तस्माद्भावाख्यो लिङ्गाख्यश्च द्विविध' प्रवर्त्तते सर्ग इति ॥ ५२ ॥

किञ्चान्यत्, तत्र दैवमष्टप्रकार, ब्राह्म प्राजापत्यं सौम्य-मैन्द्र गान्धर्वं याक्षं राक्षस पैशाचमिति । पशुमृगपक्षिसरीसृप-स्थावराणि भूतान्येवं पञ्चविधस्तैरश्च.। मानुषयोनिरेकैव। इति चतुर्दश भूतानि ॥ ५३ ॥

त्रिष्वपि लोकेषु गुणत्रयमस्ति,तत्र कस्मिन् किमधिकमित्यु-च्यते, ऊर्द्धमिति ।—अष्टसु देवस्थानेषु सत्त्वविशालः सत्त्व-विस्तारः सत्त्वोत्कट ऊर्द्धसत्त्व इति ; तत्रापि रजस्तमसी स्तः। तमोविशालो मूलतः,—पश्वादिषु स्थावरान्तेषु सर्व, सर्ग-

तच जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।
लिङ्गस्याविनिवृत्तेस्तस्मात् दुःखं स्वभावेन ॥ ५५॥
इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्य्यन्तः ।

स्तमसाधिक्येन व्याप्त, तत्रापि सत्त्वरजसी स्त । मध्ये—मानुषे रज उत्कटं, तत्रापि सत्त्वतमसी विद्येते, तस्मात् दुःखप्राया मनुष्या । एवं ब्रह्मादिस्तम्बपर्य्यन्तः,—ब्रह्मादिस्थावरान्त इत्यर्थः। एवमभौतिकः सर्गो लिङ्गसर्गो भावसर्गो भूतसर्गो दैवमानुष-तैर्य्यग्योना इति, एष प्रधानकृत. षाडशविधः सर्गः ॥ ५४ ॥

तत्रेति—तेषु देवमानुषतिर्य्यग्योनिषु जराकृत मरणकृत-श्चैव दुःखं चेतनः चैतन्यवान् पुरुष' प्राप्नोति, न प्रधानं न बुद्धिर्नाहङ्कारो न तन्मात्राणीन्द्रियाणि महाभूतानि च । कियन्तं कालं पुरुषो दुःखं प्राप्नोतीति तद्विविनक्ति, लिङ्गस्याविनिवृत्ते-रिति—यत् तन्महदादि लिङ्गशरीरेणाविश्य तत्र व्यक्तीभवति, तत् यावन्न निवर्त्तते संसारशरीरमिति तावत् सङ्क्षेपेण त्रिषु स्थानेषु पुरुषो जरामरणकृत दु.ख प्राप्नोति, लिङ्गस्याविनिवृत्तेः लिङ्गस्य विनिवृत्तिं यावत् । लिङ्गनिवृत्तौ मोक्षो मोक्षप्राप्तौ नास्ति दु'खमिति । तत् पुन कैन निवर्त्तते ? यदा पञ्चविंशति-तत्त्वज्ञानं स्यात् सत्त्वपुरुषान्यथाख्यातिलक्षणम्, इदं प्रधानमियं बुद्धिरयमहङ्कार इमानि पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्च महाभूतानि, येभ्योऽन्यः पुरुषो विसदृश इत्येवं ज्ञानाल्लिङ्ग-निवृत्तिस्तता मोक्ष इति ॥ ५५ ॥

प्रकृतेः किंनिमित्तमारम्भ इत्युच्यते—इत्येष परिसमाप्तौ निर्देशे च,प्रकृतिकृतौ—प्रकृतिकरणे प्रकृतिक्रियायां य आरम्भो महदादिविशेषभूतपर्य्यन्त. प्रकृतेर्महान् महतोऽहङ्कारः

प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥५६॥
वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥५७॥
औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्त्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥५८॥

तस्मात् तन्मात्राण्येकादशेन्द्रियाणि तन्मात्रेभ्यः पञ्चमहाभूतानीत्येष प्रतिपुरुषविमोक्षार्थं—पुरुषं पुरुषं प्रति देवमनुष्यतिर्य्यग्भावं गताना विमोक्षार्थमारम्भः, कथम् ? स्वार्थ इव परार्थ आरम्भः,—यथा कश्चित् स्वार्थं त्यक्त्वा मित्रकार्य्याणि करोति,एवं प्रधानम् । पुरुषोऽत्र प्रधानस्य न किञ्चित् प्रत्युपकारं करोति ; स्वार्थ इव न च स्वार्थः परार्थ एव, अर्थः शब्दादिविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च, त्रिषु लोकेषु शब्दादिविषयैः पुरुषा योजयितव्या , अन्ते च मोक्षेणेति प्रधानस्य प्रवृत्तिः; तथा चोक्तं —"कुम्भवत् प्रधानं पुरुषार्थं कृत्वा निवर्त्तते" इति ॥ ५६ ॥

अत्रोच्यते—अचेतन प्रधानं चेतनः पुरुष इति, मया त्रिषु लोकेषु शब्दादिभिर्विषयैः पुरुषो योज्योऽन्ते मोक्षः कर्त्तव्य इति कथं चेतनवत् प्रवृत्तिः ? सत्य, किन्त्वचेतनानामपि प्रवृत्तिर्दृष्टा निवृत्तिश्च यस्मादित्याह—यथा तृणोदकं गवा भक्षितं क्षीरभावेन परिणम्य वत्सविवृद्धिं करोति, पुष्टे च वत्से निवर्त्तते, एवं पुरुषविमोक्षनिमित्तं प्रधानम् इति अज्ञस्य प्रवृत्तिरिति ॥५७॥

किञ्च, यथा लोके दृष्टौत्सुक्ये सति तस्य निवृत्त्यर्थं क्रियासु प्रवर्त्तते, गमनागमनक्रियासु कृतकार्य्यो निवर्त्तते,तथा पुरुषस्य विमोक्षार्थं शब्दादिविषयोपभोगोपलब्धिलक्षण गुणपुरुषान्त-

रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य निवर्त्तते प्रकृतिः॥५९॥
नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥
प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥६१॥

रोपलब्धिलक्षणश्च द्विविधमपि पुरुषार्थं कृत्वा प्रधानं निवर्त्तते ॥ ५८ ॥

किञ्चान्यत्, यथा नर्त्तकी शृङ्गारादिरसैरितिहासादिभावैश्च निबद्धगीतवादित्रनृत्यानि रङ्गस्य दर्शयित्वा कृतकार्य्या नृत्यान्निवर्त्तते, तथा प्रकृतिरपि पुरुषस्यात्मानं प्रकाश्य बुद्ध्यहङ्कारतन्मात्रेन्द्रियमहाभूतभेदेन निवर्त्तते ॥ ५९ ॥

कथं को वा अस्या निवर्त्तको हेतु ? तदाह—नानाविधैरुपायैः प्रकृति पुरुषस्योपकारिण्यनुपकारिणः पुंस., कथम् ? देवमानुषतिर्य्यग्भावेन सुखदुःखमोहात्मकभावेन शब्दादिविषयभावेन ; एव नानाविधैरुपायैरात्मान प्रकाश्य अहमन्या त्वमन्य इति निवर्त्तते, सतो नित्यस्य तस्यार्थमपार्थकं चरति करोति, यथा कश्चित् परोपकारी सर्वस्योपकुरुते नात्मनः प्रत्युपकारमीहते, एवं प्रकृति पुरुषार्थं चरति करोत्यपार्थकं, पश्चादुक्तमात्मान प्रकाश्य निवर्त्तते ॥६०॥

निवृत्ता च किं करोतीत्याह—लोके प्रकृति, सुकुमारतरं न किञ्चिदस्तीत्येवं मे मतिर्भवति, येन परार्थ एवं मतिरुत्पन्ना । कस्मात्? अहमनेन पुरुषेण दृष्टाऽस्मीत्यस्य पंसः पुनर्दर्शन नोपैति

तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥ ६२॥

पुरुषस्यादर्शनमुपयातीत्यर्थः। तत्र सुकुमारतरं वर्णयति—केचिदीश्वरं कारणं ब्रुवते "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं नरकमेव वा"॥ अपरे स्वभावकारणिका ब्रुवते, "केन शुक्लीकृता हंसा मयूरा केन चित्रिता। स्वभावेनैव—" इति। अत्र साङ्ख्याचार्या आहुः, —"निर्गुणत्वादीश्वरस्य कथं सगुणतः प्रजा जायेरन्? कथं वा पुरुषान्निर्गुणादेव? तस्मात् प्रकृतेर्युज्यते, तथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति, कृष्णेभ्यः कृष्ण एव"इति। एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते। निर्गुण ईश्वरः, सगुणाना लोकाना तस्मादुत्पत्तिरयुक्तेति। अनेन पुरुषो व्याख्यातः। तथा केषाञ्चित् कालः कारणमिति, उक्तञ्च—"कालः पचति भूतानि कालः संहरते जगत्। काल सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः"॥ व्यक्ताव्यक्तपुरुषाख्याः पदार्थाः, तेन कालोऽन्तर्भूतोऽस्ति, स हि व्यक्तः, सर्वकर्तृत्वात् कालस्यापि प्रधानमेव कारणं, स्वभावोऽप्यत्रैवलीन, तस्मात् कालो न कारणं, नापि स्वभाव इति। तस्मात् प्रकृतिरेव कारण, न प्रकृतेः कारणान्तरमस्तीति न पुनर्दर्शनमुपयाति पुरुषस्य। अतः प्रकृतेः सुकुमारतरं सुभोग्यतरं न किञ्चिदीश्वरादि कारणमस्तीति मे मतिर्भवति। तथा च श्लोकेरूढम्॥ ६१॥

पुरुषो मुक्तः, पुरुष संसारी, इति नोदिते आह—तस्मात् कारणात् पुरुषो न बध्यते, नापि मुच्यते, नापि संसरति, यस्मात् कारणात् प्रकृतिरेव नानाश्रया देवमानुषतिर्य्यग्योन्या-

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥६३॥
एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥६४॥

अथ बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतस्वरूपेण बध्यते मुच्यते संसरति चेति । अथ मुक्त एव स्वभावात् स सर्वगतश्च कथं संसरति ? अप्राप्तप्रापणार्थं संसरणमिति, तेन पुरुषो बध्यते, पुरुषो मुच्यते, पुरुषः संसरतीति व्यपदिश्यते येन संसारित्व विद्यते; सत्त्वपुरुषान्तरज्ञानात् तत्त्वं पुरुषस्याभिव्यज्यते, तदभिव्यक्तौ केवल शुद्धो मुक्तः स्वरूपप्रतिष्ठः पुरुष इति । अत्र यदि पुरुषस्य बन्धो नास्ति, ततो मोक्षोऽपि नास्ति । अत्रोच्यते—प्रकृतिरेवात्मानं बध्नाति मोचयति च, यत्र सूक्ष्मशरीरं तन्मात्रकं त्रिविधकरणोपेतं तत् त्रिविधेन बन्धेन बध्यते; उक्तञ्च —"प्राकृतेन च बन्धेन तथा वैकारिकेण च । दाक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते ॥" तत् सूक्ष्मं शरीरं धर्माधर्मसयुक्तम् ॥६२॥

प्रकृतिश्च बध्यते, प्रकृतिश्च मुच्यते, संसरतीति कथम् ? तदुच्यते—रूपैः सप्तभिरेव—एतानि सप्त प्रोच्यन्ते, धर्मो वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यम्, एतानि प्रकृतेः सप्त रूपाणि, तैरात्मान स्वं, बध्नाति प्रकृतिः, आत्मना स्वेनैव, सैव प्रकृति , पुरुषस्यार्थं. पुरुषार्थं. कर्त्तव्य इति विमोचयत्यात्मानमेकरूपेण ज्ञानेन ॥ ६३ ॥

कथं तज्ज्ञानमुत्पद्यते ?—एवमुक्तेन क्रमेण, पञ्चविंशतितत्त्वालोचनाभ्यासादियं प्रकृतिरयं पुरुष एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानीति पुरुषस्य ज्ञानमुत्पद्यते, नास्मि नाहमेव

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम्।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥६५॥
* दृष्टा मयेत्युपेक्षक एको दृष्टाहमित्युपरमत्यन्या।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥६६॥

भवामि, न मे मम शरीर तत, यतोऽहमन्य. शरीरमन्यत्. नाहमिति अपरिशेषम् अहङ्काररहितम्, अविपर्ययाद्विशुद्धं विपर्ययः संशयः अविपर्ययादसंशयाद्विशुद्ध, केवलं तदेव नान्यदस्तीति मोक्षकारणम्, उत्पद्यतेऽभिव्यज्यते, ज्ञानं पञ्चविंशति तत्त्वज्ञान पुरुषस्येति ॥ ६४ ॥

ज्ञाने पुरुषः किं करोति ?—तेन विशुद्धेन केवलज्ञानेन, पुरुषः प्रकृतिं पश्यति प्रेक्षकवत् प्रेक्षकेण तुल्यम्, अवस्थित· स्वस्थः, यथा रङ्गप्रेक्षकोऽवस्थितो नर्त्तकीं पश्यति, स्वस्थः स्वस्मिंस्तिष्ठति स्वस्थः स्वस्थानस्थितः। कथम्भूतां प्रकृतिम् ? निवृत्तप्रसवां निवृत्तबुद्ध्यहङ्कारकार्य्याम्, अर्थवशात् सप्तरूपविनिवृत्तां निवर्त्तितपुरुषोभयप्रयोजनवशात् यैः सप्तभिः रूपैर्धर्मादिभिरात्मानं बध्नाति तेभ्य· सप्तभ्यो रूपेभ्यो विनिवृत्तां प्रकृतिं पश्यति ॥ ६५ ॥

किञ्च, रङ्गस्थ इति यथा रङ्गस्थ इत्येवमुपेक्षक एकः केवलः शुद्ध· पुरुषस्तेनाहं दृष्टेति ज्ञात्वा उपरता निवृत्ता, एका एकैव प्रकृति त्रैलोक्यस्यापि प्रधानकारणभूता न द्वितीया प्रकृतिरस्ति मूर्त्तिबधे जातिभेदात्, एव प्रकृतिपुरुषयोर्निवृत्तावपि व्यापकत्वात् सयोगोऽस्ति न तु संयोगात् कृतः सर्गो भवति। सति संयोगेऽपि तयोः,—प्रकृतिपुरुषयोः सर्वगतत्वात् सत्यपि संयोगे, प्रयोजनं नास्ति सर्गस्य सृष्टेः चरितार्थत्वात्, प्रकृते-

---

* भाष्यदर्शनात् आर्य्यायां मात्रापेक्षया मात्राधिक्यदर्शनाच्च पूर्वार्द्धे "रङ्गस्य इत्युपेक्षक एको दृष्टाऽहमित्युपरता चैका" इति पाठ, समीचीन इति मन्ये।

सम्यक् ज्ञानाधिगमात् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवत् धृतशरीरः ॥६७॥
प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥६८॥

द्विविधं प्रयोजन शब्दविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च, उभयत्रापि चरितार्थत्वात् सर्गस्य नास्ति प्रयोजनं यः पुनः सर्ग इति । यथा दानग्रहणनिमित्तम् उत्तमर्णाधमर्णयोर्द्रव्यविशुद्धौ सत्यपि संयोगे न कश्चिदर्थसम्बन्धो भवति, एवं प्रकृतिपुरुषयोरपि नास्ति प्रयोजनमिति ॥ ६६ ॥

यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षो भवति ततो मम कस्मान्न भवतीत्यत उच्यते—यद्यपि पञ्चविंशतितत्त्वज्ञान भवति तथाऽपि संस्कारवशाद्धृतशरीरो योगी तिष्ठति ; कथम् ? चक्रभ्रमवच्चक्रभ्रमेण तुल्यम् , यथा कुलालश्चक्र भ्रमयित्वा घटं करोति, मृत्पिण्डं चक्रमारोप्य पुनः कृत्वा घटं पर्य्यामुञ्चति चक्रं भ्रमत्येव संस्कारवशात्, एवं सम्यग्ज्ञानाधिगमादुत्पन्नसम्यग्ज्ञानस्य धर्मादीनामकारणप्राप्तौ एतानि सप्त रूपाणि बन्धनभूतानि सम्यग्ज्ञानेन दग्धानि, यथा नाग्निना दग्धानि बीजानि प्ररोहणसमर्थानि, एवमेतानि धर्मादीनि बन्धनानि न समर्थानि । धर्मादीनामकारणप्राप्तौ संस्कारवशाद्धृतशरीरस्तिष्ठति, ज्ञानाद्वर्त्तमानधर्माधर्मक्षय. कस्मान्न भवति, वर्त्तमानत्वादेव, क्षणान्तरे क्षयमप्येति, ज्ञानं त्वनागत कर्म दहति, वर्त्तमानशरीरेण च यत् करोति तदपीति, विहितानुष्ठानकरणादिति, संस्कारक्षयाच्छरीरपाते मोक्षः ॥ ६७ ॥

स किंविशिष्टो भवतीत्युच्यते—धर्माधर्मजनितसंस्कारक्षयात् प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानस्य निवृत्तौ ऐकान्तिक

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥६९॥
एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्
॥ ७० ॥
शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्य्याभिः ।
सङ्क्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥७१॥
सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि
॥ ७२ ॥

इति साङ्ख्यकारिका समाप्ता ।

मवश्यम्, आत्यन्तिकमनन्तर्हित, कैवल्य केवलभावान्मोक्षम्, उभयम् ऐकान्तिकात्यन्तिकमित्येवं विशिष्ट कैवल्यमाप्नोति ॥६८॥

पुरुषार्थो मोक्षस्तदर्थं ज्ञानमिदं गुह्य रहस्यं, परमर्षिणा श्रीकपिलर्षिणा, समाख्यात सम्यगुक्त, यत्र ज्ञाने, भूतानां वैकारिकाणा, स्थित्युत्पत्तिप्रलया अवस्थानाविर्भावतिरोभावा., चिन्त्यन्ते विचार्य्यन्ते, येषा विचारात् सम्यक् पञ्चविंशतितत्त्वविवेचनात्मिका सम्यग्यत सविर्त्तिरिति ॥ ६९ ॥

साङ्ख्यं कापिलमुनिना प्रोक्तं ससारविमुक्तिकारण हि ।
यत्रैता: सप्ततिरार्य्या भाष्यञ्चात्र गौडपादकृतम् ॥

इति साङ्ख्यकारिकाव्याख्या समाप्ता ।